ANEKĀRTHA TILAKA

OF

MAHĪPA

Sources of Indo-Aryan Lexicography

1

ANEKĀRTHA-TILAKA

OF

MAHĪPA

CRITICALLY EDITED BY

M. M. PATKAR

DECCAN COLLEGE

Postgraduate and Research Institute

POONA

महीपविरचितः

अनेकार्थतिलकः

critically edited by

Madhukar Mangesh Patkar, B. A.

POONA

1947

First Edition 500 Copies July 1947

Price Rs. 6

Code No.: L. 4

Printed by Ramachandra Yesu Shedge at the Nirnaya Sagar Press, 26–28, Kolbhat Street, Bombay 2 and Published by Dr. S. M. Katre for the Deccan College Postgraduate and Research Institute, 10 Connaught Road, Poona 1.

PREFATORY NOTE.

Among the contributory studies which the Institute has planned towards the building up of a Dictionary of Sanskrit on Histroical Principles, the present work forms one of the most important branches. It initiates a new series of publications called the "Sources of Indo-Aryan Lexicography" in which critical editions of unpublished Sanskrit lexicons will be included from time to time embodying the best principles of Indian Textual Criticism and designed to serve the main purpose, viz., the compilation of a dictionary of Sanskrit based entirely on the Kośa literature, and illustrating the modern principles of scientific lexicography.

It is hoped that this new series, as well as the Monograph, Dissertation and Handbook Series inaugurated during the 125th year of the original Foundation of this Institute will have a long and continuous scholarly career and achieve the objective towards which they are directed.

S. M. K.

PREFACE.

A few years ago when I was working on the preparation of the Descriptive Catalogue of the Lexicographical Manuscripts in the Government Manuscripts Collection at the Bhandarkar Oriental Research Institute, Poona, I happened to notice three manuscripts of the *Anekārthatilaka* of Mahīpa in that collection. On further inquiry I learnt that the work was not available in print. I, therefore, decided to prepare a critical edition of the work and secured one more manuscript of it which existed in the Manuscript Library of the Bombay Branch of the Royal Asiatic Society, Bombay. I chanced to show my collation of the four manuscripts to Dr. S. M. KATRE, the Director of the Deccan College Post-graduate and Research Institute, Poona, who not only encouraged me to edit it but also expressed his willingness to have the work published by the Institute. The present edition thus owes more to the constant encouragement I received from time to time from him than to my own labours on it.

It only remains for me to express my thanks to all those who have helped me in preparing the present edition. In this connection my best thanks are due to Dr. KATRE for giving me the opportunity to have my work published under the auspices of the Deccan College Research Institute; to Prof. P. K. GODE, M. A. Curator, Bhandarkar Oriental Research Institute, Poona, for allowing me the loan of the three manuscripts of the *Anekārthatilaka* from Governments Manuscripts collection for a protracted period of time; and to Dr. R. G. HARSHE, D. Litt., for procuring for me a manuscript of the work from the Bombay Branch of the Royal Asiatic Society, Bombay. I am also thankful to Mr. K. S. HINGWE, B. A., Librarian of the Institute who ungrudgingly kept at my disposal editions of several lexicons for consultation. Lastly, I have to put on record my thanks to Pandit N. R. ACHARYA, Kāvyatīrtha of the Nirnaya Sagar Press who rendered me help in correcting the proofs as also in suggesting a few readings in cases of doubt and to Mr. R. Y. SHEDGE, the Manager of the Nirnaya Sagar Press for the efficient printing of the text.

I am aware of the shortcomings of the edition and apologize to the reader for the defects in it for which I am solely responsible.

Deccan College,
Research Institute,
POONA.
5th October 1946.

M. M. Patkar.

INTRODUCTION.

The present edition of the *Anekārthatilaka* of Mahīpa is based on the following four Manuscripts, the first three of which belong to the Bombay Government manuscripts Collection deposited at the Bhandarkar Oriental Research Institute, Poona, and the last to the Manuscripts Library of the Bombay Branch of Royal Asiatic Society, Bombay :—

1 A = No. 38 of 1872-73- Paper-manuscript; 11 leaves; 19 lines to a page; 73 letters to a line; Devanāgarī characters with पृष्ठमात्राs; handwriting very small but fine, legible and uniform; complete. The manuscript bears the date Saṁvat 1490 (i. e. A. D. 1434).

2 B = No. 202 of 1882-83-Paper-manuscript; 21 folios; 14 lines to a page; 52 letters to a line; Devanāgarī characters with पृष्ठमात्राs; handwriting bold, legible and uniform; complete The manuscript does not bear date but appears to be fairly old.

3 C = No. 567 of 1887-91-Paper-manuscript; 22 folios; 15 lines to a page; 48 letters to a line; Devanāgarī characters with पृष्ठमात्राs; handwriting clear, legible and uniform; complete; contains marginal additions and notes in a different hand; the text is corrupt and incorrect in many places. The manuscript bears no date.

4 D = No. 98 Bhau Daji collction of the Bombay Branch of Royal Asiatic Society; Paper-manuscript; handwriting clear, legible and uniform; complete. The date recorded is Saṁvat 1624.[1]

The work

The *Anekārthatilaka* also called *Nānārthatilaka*, is unlike the *Amarakos'a*, a dictionary dealing with homonyms i. e. words having more meanings than one. It is divided in four *Kāṇḍas*, each having 45, 362, 290 and 213 verses respectively. The *Kāṇḍas* are divided ac-

1 Cf. संवत् १६२४ वर्षे भाद्रपदमासे तृतीयायां तिथौ गुरुवासरे लिलेषि। परोपकाराय लिपापयामास· This endorsement is followed by a verse which reads as under :—

वीरदासस्य मन्त्रीशो हर्षाख्यो जिनशासने।
प्रसिद्धः परसिध्यर्थमनेकार्थतिलकं ददौ ॥

cording to the number of syllables of words in each *Kāṇḍa*. For example, the first *Kāṇḍa* deals with words having one syllable only and is called the *Ekākṣarakāṇḍa*, the second is called *Dyakṣarakāṇḍa*, and the third, the *Tryakṣarakāṇḍa*. The fourth *Kāṇḍa* which deals with miscellaneous words is called the *Saṁkīrṇavarṇakāṇḍa* and contains mostly words of four, and occasionally of five syllables. The arrangement of words is genearlly in the alphabetical order although in several places the author deviates from this arrangement.

The author

The authorship of the work is ascribed to one Mahīpa about whose life and personality nothing is known at present. In the concluding verse to every chapter we find scanty reference to his lineage. In the verse he states that he was the son of Soma (or of Luner Race) and that his mother's name was Saubhāgyadevī. The verse reads as follows :—

श्रीमान्सोमभवः सलक्षसचिवो वाक्कण्ठभूषाग्रग्
संप्रासूत सुतं महीपममलं सौभाग्यदेवी च यं।
संकीर्णाख्य इहोज्वलः समुन्चिते विद्वद्गिरां पूर्णतां
ग्रन्थे तद्रचितेऽधुना यमभजत्काण्डश्च•पश्चाग्रजः ॥

Mahīpa's indebtedness to previous writers.

In one of the concluding verses to his lexicon Mahīpa states that he composed his work with the assistance of the works of the previous authors such as Pāṇini, Ahīndra, Bhāguri, Bhoja, Bheḍa, Hema i. e. Hemacandra and Amara.[1] It is possible that Mahīpa must have consulted several previous lexicons while composing his work. This is evident from the fact that several of his lines or half lines agree to a great extent in sense and sometimes entirely with whole lines or half lines in some of the carliar lexicons. I give below a few of such instances to show how Mahīpa must have borrowed from previous authorities :—

1 Cf. पाणिन्यहीन्द्रगुरुभागुरिभोजभेड-
हेमामरादिसमुदीरितशास्त्रसारात् ।
नानार्थरत्नतिलकं स च सिद्धिशब्द-
रत्नाकरं समतनोत्सुमतिर्महीपः ॥

Anekārthatilaka		Other Works.
1. 23ab	त्विट् प्रभायां जिगीषायां व्यवसाये रुचौ गिरि ।	त्विट् शोभायां जिगीषायां व्यवसाये रुचौ गिरि । *Vyākhyāsudhā* on *Amara* 1. 4. 34 (Kālavarga).
1. 28d	निर्निश्चयनिषेधयोः ।	निर्निश्चयनिषेधयोः । *Amara* 3. 4. 253b; also *Viśvakośa.*
2. 75a	कष्टं तु गहने कृच्छ्रे ।	कष्टं तु गहने कृच्छ्रे । *Vyākhyāsudhā* on *Amara.*
2. 86a	खादिः किणे शवरथे ।	खादिः किणे शवरथे । *Haimakośa,* 2, 84d.
2. 87cd	खलु वारणजिज्ञासावाक्यभूषासु सांत्वने ।	खलु स्याद्वाक्यभूषायां जिज्ञासायां च सांत्वने । *Medinī.*
2. 89ab	गुडः कुञ्जरसन्नाहे गोलकेक्षुविकारयोः ।	गुडः स्याद्गोलके हस्तिसंनाहेक्षुविकारयोः । *Medinī.*
2. 89c	गुडा स्नुहीगुटिकयोः	स्नुही गुडिकयोर्गुडा । *Rudrakośa.*
2. 92cd	गन्धो गर्वे गन्धके चामोदे सम्बन्धलेशयोः ।	गन्धः सम्बन्धलेशयोः । गन्धकामोदगर्वेषु । *Haima.*
2. 118cd	ज्येष्ठा तु गृहगोधायां नक्षत्रौषधिभेदयोः ।	ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः । *Medinī.*
2. 127d	त्रायमाणौषधेपि च ।	त्रायमाणौषधावपि । *Haimakośa.*
2. 128ab	तर्को विचारे कांक्षायामूहकर्मविशेषयोः ।	तर्को वितर्के कांक्षायामूहकर्मविशेषयोः । *Haimakośa.*
2. 140a	तिक्ता च कटुरोहिण्यां ।	तिक्ता तु कटुरोहिण्यां । *Haimakośa.*
2. 153ab	धाना भृष्टयवेङ्कूरधन्याकचूर्णसक्तुषु ।	धाना भृष्टयवेङ्कूरे धान्याके चूर्णसक्तुषु । *Haimakośa.*
2. 246a	यन्ता सूते हस्तिपके ।	यन्ता हस्तिपके सूते । *Amara.*
3. 23a	आसत्तिः संगमे लाभे ।	आसत्तिः संगमे लाभे । *Haimakośa.*
3. 25cd	आयस्तः क्लिष्टिते क्षिप्ते तेजिते कुपिते हते ।	आयस्तस्तेजिते क्षिप्ते क्लेशिते कुपिते हते । *Medinī.*
4. 149ab	मृष्टेरुको वदान्ये स्यान्मिष्टाशिन्यतिथिद्विषि ।	मृष्टेरुको वदान्येऽपि मिष्टाशिन्यतिथिद्विषि । *Medinī.*

The foregoing comparison shows how Mahīpa has drawn upon previous lexicons. Many of his lines and half lines are to be traced in the *Haimakos'a* and the *Medinīkos'a.* It may be that Mahīpa must have borrowed from the two lexicons which were probably popular at his time; or it is probable that all the three might have borrowed from some common texts known to them.

Date of Mahīpa

We have already seen that Mahīpa refers to Hemacandra as one of his authorities. As Hemacandra flourished between A. D. 1078 and 1175 we can fix one limit for Mahīpa's date. As regards the lower limit we have to rely on the evidence supplied by the manuscript material at our disposal. The earliest dated manuscript[1] of the *Anekārthatilaka* known to us gives the date of the copy as saṁvat 1490 i. e. A. D. 1434. On the strength of these two referencss we can conclude that Mahīpa must have flourished between A. D. 1175 and 1434.

Dr. STEIN[2] records the date of composition of the present work as saṁvat 1430 which corresponds to A. D. 1374. As the manuscripts so far available do not record the date of composition we are unable to verify the statement made in Dr. STEIN'S *Catalogue of Jammu and Kashmir manuscripts.* If, however, the above statement is correct we may assign the last quarter of the fourteenth century to the literary activity of Mahīpa.

1 This is Ms. no. 38 of 1872–73 of the Govt. Mss. Collection (=manuscript A of the present edition). On fol. 11b it bears the following endorsement re. its date: "सं० १४९० वर्षे ग० जयनंदनो लिलिखे ॥ ग्रं ९०९ ॥

Cat. of Kashmir and Jammu Mss., p. 52 [Note—I tried to procure a copy of the manuscript of the *Anekarthatilaka* which exists in the library at Jammu; but in spite of my earnest efforts I could not succeed in getting either the copy of the manuscript or even the extract of the colophon from the authorities.]

महीपविरचितः

अनेकार्थतिलकः

प्रथमः काण्डः ।

॥ नमो भगवत्यै सरस्वत्यै ॥

या संस्मृता प्राणभृतां क्षणेन संसाधयेदिष्टसमस्तसिद्धिं ।
विश्वस्य सृष्टिस्थितिनाशहेतुः सा भारती यच्छतु वाञ्छितं वः ॥ १ ॥

कवीन्द्रकुमुदानन्दकन्दोद्गमसुधाकरः ।
विरच्यते चतुःकाण्ड्या रम्योऽनेकार्थसंग्रहः ॥ २ ॥
मुख्योऽत्र शब्दः प्रथमं स्वं युक्त्यालंकृतः कृतः ।
परस्त्वर्थान्तराख्यायी सप्तम्यन्त इति स्थितिः ॥ ३ ॥
अकाराद्यादिभिः शब्दैः क्षान्तैरेकाक्षराभिधः ।
ग्रन्थेस्मिन्प्रथमः काण्ड आविरस्ति सुविस्तरात् ॥ ४ ॥
अः कृष्णे विनतासूनौ आ विधातरि मन्मथे ।
आ अव्ययं स्मृतौ वाक्ये स्यादाः सन्तापकोपयोः ॥ ५ ॥
आङ् सीमायामभिव्याप्तौ क्रियायोगेषदर्थयोः ।
इः स्मरेऽर्थेऽव्ययं खेदे कोपोक्तावी भुवि श्रियाम् ॥ ६ ॥
उः शम्भावुत्प्रकाशे स्यान्मोक्षे भावोर्द्धशक्तिषु ।
उ क्रोधे बन्धने लोभे विभागेऽव्ययं गुरौ ॥ ७ ॥
पालने रक्षणे च स्यादूः पृथिव्यां देवमातरि ।
ऋ दैत्यमातरि स्यात्तु देव्यामृस्तु लतान्तरे ॥ ८ ॥
वाराखामे महीध्रे च विष्णावैरद्रिजापतौ ।
ओर्धातयौरनन्ते स्यादं ब्रह्मण्यः कपालिनि ॥ ९ ॥

---

2 — ab) for ab D reads कवींद्रकुमुदोद्गच्छदंकुरं कुरयन्क्रमात्.
4 — a) BC अथाकारादिभिः. — b) D सारैः for क्षांतैः. — d) D सुविस्तरः
9 — b) D अद्रिजातिषु.

कं सुखे सलिले शीर्षे कः स्वर्गस्मरवह्निषु ।
सुहृत्सूर्ययमोद्योतकेकि(की)ब्रह्मात्मवायुषु ॥ १० ॥
कुर्भूमौ कुत्सिते शब्दे पापीयसि निवारणे ।
ईषदर्थेऽथ किं प्रश्ने वितर्काश्चर्ययोरपि ॥ ११ ॥
कुत्सनाक्षेपनिन्दासु किम् कियत्यपि दृश्यते ।
खं पुनर्गगने बिन्दाविन्द्रिये चन्द्रमण्डले ॥ १२ ॥
वर्णखण्डसुखस्वर्गशून्यसंवित्सुखौ रवौ ।
गं गीते गस्तु गन्धर्वे गणनायकगीतयोः ॥ १३ ॥
गौर्वज्रेऽप्सु वृषे धेनौ वाचि दिग्बाणयोर्गिरि ।
भूमयूखसुखस्वर्गसत्यवह्न्यक्षिमातृषु ॥ १४ ॥
गीस्तु वाचि सरस्वत्यां दुर्गायां ककुभिः स्मृता ।
घो घटे हनने रुद्रे घा किङ्किण्यां घनस्वने ॥ १५ ॥
ङ शब्दो विषये भीमे चश्चन्द्रे तस्करे तरौ ।
चाव्ययं तु समाहारे पादपूर्तौ समुच्चये ॥ १६ ॥
परस्परार्थे साकल्ये कारणेऽवधृतावपि ।
पक्षान्तरे समाने स्याच्चुश्चकोरे चतुष्पथे ॥ १७ ॥
छः सूर्ये छेदके चारे छं तु छन्दसि निर्मले ।
जो जिष्णौ विगते जीवे जूशब्दाम्बरवाचि च ॥ १८ ॥
पिशाच्यां जवने कीटे जो नष्टे चारुमारुते ।
ज्ञः स्याद्विचक्षणे चन्द्रपुत्रे मुनिविरिञ्चयोः ॥ १९ ॥
ञः शब्दो गायने गूढरूपके घर्घरध्वनौ ।
टः शब्दे पवने भूमौ करण्टे टं पुनर्गवि ॥ २० ॥

---

10 — a) AB मुखे for सुखे.
11 — a) B भौम (मे) for भूमौ.
12 — d) B चंद्र मंडले for चंद्र°.
13 — d) D transp. शून्य and संवित्.
14 — a) CD गौर्धेनौ सलिले वाद्रे. — d) CD पवन्यक्षि for सत्यवन्ह्यक्षि.
20 — a) B ञः पुनर् for ञः शब्दो.

ठो घटे सुखने रुद्रे चन्द्रमण्डलशून्ययोः ।
डः ध्वनौ गिरिशे जापे ढोऽगुणे ध्वनिढक्कयोः ॥ २१ ॥
णो मोक्षे निष्फले स्पष्टे तः क्रोडे चौरपुच्छयोः
युद्धेऽथ ता महीलक्ष्म्योस्त्वक् चर्मणि च वल्कले ॥ २२ ॥
त्विट् प्रभायां जिगीषायां व्यवसाये रुचौ गिरि ।
तृट् तृष्णेवमता विद्धिः पिपासालिप्सयोरपि ॥ २३ ॥
तु स्मृतौ च समाहारे साकल्ये कारणेऽव्ययं ।
थो भीषणे भरेऽद्रौ दं पत्न्यां दा दातृदानयोः ॥ २४ ॥
बन्धे विखण्डने चाथ दृक् स्याद्दर्शननेत्रयोः ।
द्युर्वह्नौ दिवसे द्यौस्तु नाके नभसि धं धने ॥ २५ ॥
धो धीरे धनदेऽपि स्यादश्ववारकचित्रयोः ।
धीर्धियामिषुधौ धा च गुह्यकेशे च धातरि ॥ २६ ॥
धूस्तु धूर्ते भरे कम्पे रथास्ये नस्तु संविदि ।
अस्मानस्माकमस्मभ्यं स्थाने निर्बन्धबुद्धयोः ॥ २७ ॥
नु स्तुतौ तु वितर्के स्याद्विकल्पेऽनुशयेऽव्ययं ।
प्रश्नेऽथ निर्नरे भूपे निर्निश्चयनिषेधयोः ॥ २८ ॥
क्रीताद्यर्थे चये ना न नो निषेधेऽव्ययानि च ।
नौस्तरण्यां च नी नद्यां न्यक् निम्ने नीचकात्स्र्न्ययोः ॥ २९ ॥
पः पातरि पयःपाने प्रौढे पवनमार्गयोः ।
पूः शरीरे पुरे चाथ फो जञ्झानिलफेनयोः ॥ ३० ॥
फूः फूत्कृतौ च वातूले बः पद्मे वरुणे घटे ।
विट् प्रवेशे नरे वैश्ये वाक् भारत्यां वचस्यपि ॥ ३१ ॥

23 — ab) Cf. *Vyākhyāsudhā* on *Amara*, 1. 4. 34 (Kālavarga).

26 — d) D स्वयंभुवि for धातरि.

27 — d) BD बुद्धनिबन्धयोः.

28 — a) D निर्भरे for निर्नरे. — d) A °भूषयोः for °निषेधयोः; for 28d cf. *Amara* 3. 4. 252.

31 — b) A कटे for घटे.

वः शम्भौ वरुणे **वा** तु स्यादौपम्ये गणेऽव्ययं ।
विः खगे खेऽपि **भं** धिष्ण्ये **भोऽ**लिशुक्रयोः ॥ ३२ ॥
भा प्रभावे मयूखे **भूः** रुत्पत्तिस्थितिभूमिषु ।
भीः र्भये **मो** विधौ चन्द्रे शिवे शिरसि **मा** श्रियाम् ॥ ३३ ॥
माने मातरि **मा** शब्दो निषेधार्थेऽव्ययं स्मृतौ ।
मू शब्दस्तु ग्रहे बन्धे **मास्तु** मासे निशाकरे ॥ ३४ ॥
यो वेधसि यमे वाते **यमम्भसि** पशावपि ।
यातर्यपि खट्वाङ्गे लक्ष्म्यां यानेऽथ **रः** स्मरे ॥ ३५ ॥
तीव्रे वैश्वानरे शब्दे रामे वज्रे नरेऽथ **राः** ।
कनके विभवे मेघे स्थानके **रुस्तु** रक्षणे ॥ ३६ ॥
भये दिनाधिपे शब्दे **री** गते **रुक्** प्रभेच्छयोः ।
किरणे **रुजू** व्यथायां च **रे** हूताव्ययं स्मृतौ (तम्) ॥ ३७ ॥
ला दाने **लूश्च** लवने **ल** इन्द्रे चलनेऽमृते ।
लिः र्लावे **लीः** र्द्रवे श्लेषे कङ्कणे दृढबन्धने ॥ ३८ ॥
श्रीः प्रभाभारतीलक्ष्मीसंपत्सु सरलद्रवे ।
शं सुखे स्याच्च कल्याणे **शीः** शये **शुः** सुधाकरे ॥ ३९ ॥
षूः प्रसूतौ च **षः** श्रेष्ठे **सः** परोक्षेथ **सा** श्रियां ।
सन् शोभने प्रशस्ते स्याद्विद्यमाने च सत्यपि ॥ ४० ॥
सत्यपूजितयोश्चाथ **स्वः** स्वर्गपरलोकयोः ।
स्वो ज्ञातावात्मनि **स्वं** तु निजेर्थे **हः** शिवे करे ॥ ४१ ॥
वीरे भयङ्करे **ह** स्यात्सम्बुद्धौ पादपूरणे ।
हा शुग्दुःखविषादेषु **ही** विषादेपि विस्मये ॥ ४२ ॥

---

36 — c) AB मेघे for मेघे.
37 — a) A भव्ये for भये. — c) B मयूखे for किरणे.
38 — c) A पुनः for द्रवे.
39 — d) A विधौ सति for सुधाकरे.
40 — d) BC सज्जने for सत्यपि.

दुःखहेतौ च हुं स्वल्पे परप्रश्नवितर्कयोः ।
हि हेतौ पादपूर्तौ च विशेषेऽप्यवधारणे ॥ ४३ ॥
हे हूतावपि सम्बुद्धौ हं खेदे रोषभाषणे ।
अव्ययं क्ष्मा भुवि ज्यायां क्षः क्षेत्रे रक्षसि क्षमे ॥ ४४ ॥
श्रीमत्सोमभवः सलक्षसचिवो वाक्कण्ठभूषाङ्कभृत्
सन् प्रासूतसुतं महीपममलं सौभाग्यदेवी च यं ।
तत्सृष्टेतिमुदे विदामनुपमे नानार्थनामालये
ग्रन्थेऽस्मिन्प्रथमः पृथौ समभवत्काण्डोऽयमेकाक्षरः ॥ ४५ ॥

इत्यनेकार्थतिलके एकाक्षरसंज्ञः प्रथमः काण्डः ॥

---

44 — c) For c AB read संस्मृतावव्ययं चाथ.

Colophon : — BC (B सचिवश्रीमहिपकृतौ) महीपकोशस्यानेकार्थ°.

द्वितीयः काण्डः ।

अथ द्वितीयं काण्डम् ।

अकाराद्यादिभिः शब्दैः अस्मिन् वर्णद्वयाभिधः ।
द्वितीयोऽनुपमः काण्डः क्रमादारभ्यतेऽधुना ॥ १ ॥
अर्घः पूजाविधौ मूल्येऽप्यब्जो धन्वन्तरौ तरौ ।
चन्द्रे शङ्खेऽपि जम्बालेऽब्जं तु नीरजसंख्ययोः ॥ २ ॥
अक्षो बिभीतके कर्षे रावणौ शकटात्मनोः ।
रथस्यावयवे तुच्छे व्यवहारवराटयोः ॥ ३ ॥
पाशके चाक्षमाकाशेन्द्रियसौवर्चलेष्वलिः ।
हालामधुलिहोरभ्रमभ्रके गगने घने ॥ ४ ॥
अंशुर्दिनेश्वरे रश्मावन्त्यस्त्वन्त्यभवेऽधमे ।
अर्को वृक्षान्तरे शक्रे स्फटिके सूर्यताम्रयोः ॥ ५ ॥
अकं दुःखाघयोरङ्कश्चिह्ने रूपकभूषयोः ।
उत्संगे नाटकाद्यंशे समीपस्थानमन्तुषु ॥ ६ ॥
अध्वा तु समये वर्त्मन्यजो विष्णौ रघूद्वहे ।
विरिञ्चे मन्मथे रुद्रे मेषेऽद्योत्र परत्र च ॥ ७ ॥
अगो वृक्षे रवौ शैले सर्पेऽघं वृजिने घने ।
व्यसनाशर्मणोरर्चा प्रतिमापूजयोरपि ॥ ८ ॥

B om. अथ द्वितीयं काण्डम्.

1 — a) B अकारादिभिः — b) B क्षांतेः for अस्मिन्; D °भिधे.

2 — a) C अर्घं°; — b) C (corrupt) धात्वन्तरो for धन्वन्तरौ तरौ; — d) AD संखे for शंखे; D नारजंक्षयोः.

4 — b) B सोवर्चले; — c) C होला for हाला; C माधुलिहो for मधु°; C om. (hapl) मभ्र.

5 — a) C लेशे रवौ for दिनेश्वरौ; — d) ABD रवि for सूर्य.

6 — a) C अघः for अघयोः. — b) C adds च after रूपक. — d) C समीपे for समीप.

7 — b) D रघूद्वहो- for रघूद्भवे; — c) C लोकेश for विरिंचे; C मन्मथ for मन्मथे.

8— a) C वृक्षा for वृक्षे; BD transp. शैले and सर्पे.

अन्तः स्वरूपे निकटे प्रान्तेऽवयवनाशयोः ।
निश्चयेऽपि भवेदब्धिः पारावारतडागयोः ॥ ९ ॥
अग्रं श्रेष्ठेऽधिके चोर्द्ध्वपलमाने पुरःस्मृतं ।
संघाते प्रथमे भिक्षा प्रकारप्रान्तयोरपि ॥ १० ॥
अरोजिनेऽ**रं** चक्रांगे शीघ्रगे सत्वरे स्मृतं ।
अस्तः शैलान्तरे क्षिप्ते स्यादस्रः कोणकेशयोः ॥ ११ ॥
अस्रं तु रुधिरेप्यश्रुण्यर्हन् तीर्थंकरे गुरौ ।
अर्थः कार्येऽभिधेये चाभिप्राये विषये धने ॥ १२ ॥
निवृत्तौ कारणे वस्तुन्यंह्रिर्वृक्षपादयोः ।
अणुर्व्रीह्यल्पयोरद्रावर्त्तिस्त्वटनिपीडयोः ॥ १३ ॥
अब्दः संवत्सरे मेघे गिरौ वासकमुस्तयोः ।
अहिर्वप्रे रवौ वृत्रे राहावध्वगसर्पयोः ॥ १४ ॥
अद्रिः सूर्ये धरेऽविस्तु मेषेऽर्के कम्बले गिरौ ।
अन्दूश्च निगडे भूषाभिद्वर्वीरश्मिकीलयोः ॥ १५ ॥
अट्टो हट्टे चतुष्केऽश्मभेदेर्यः प्रभुवैश्ययोः ।
अण्डं कोशे च मुष्के चानु सादृश्येऽप्यनन्तरे ॥ १६ ॥
अर्द्धः खण्डे बुधैर्दृष्टमर्द्धं मानसमांशयोः ।
अलं मण्डनसामर्थ्यनिषेधेष्वथ मङ्गले ॥ १७ ॥
प्रश्नानन्तर्यकार्त्स्न्येषु प्रारम्भेऽथो तथाव्ययं ।
अधि स्यादधिके स्वामिन्यपि प्रश्ने समुच्चये ॥ १८ ॥

---

9 — a) C स्वरूप for स्वरूपे. — c) B चांतरालेब्धेः for ऽपि भवेदब्धिः.

11 — a) C च रक्तांगे for ऽरं चक्रांगे. — b) AB मतं for स्मृतं. — c) ABD शैलभिदि for शैलांतरे.

13 — a) C निवृत्ते for निवृत्तौ. — b) B मूलयोः for पादयोः; — c) B अणु for अणुः; — d) C repeats रद्रा; C अनिट् डयोः for अटनिपीडयोः.

14 — a) A विप्रे for वप्रे; cf. Kṣīrasvāmī on *Amara* 3. 3. 238. "अपि शब्दात् सर्पे वप्रे च." — c) C in marg. (*sec. m.*) अर्बुदौ for गिरौ. — d) AB केतौ for राहौ.

17 — b) A अंसयोः for अंशयोः.

शङ्कासम्भावनागर्हास्वस्रं भक्के शितेपि च ।
अति स्मृतौ प्रशंसायामाधिक्ये लङ्घने जवे ॥ १९ ॥
अङ्गादेशेऽङ्गमाधारे प्रधाने चान्तिके तनौ ।
शिक्षाद्यवयवोपायेष्वङ्गसम्बोधनेऽव्ययम् ॥ २० ॥
आजिः क्षणे समक्ष्मायां युध्याधिर्बन्धकाशयोः ।
मानसार्त्तावधिष्ठाने व्यसनेऽपि प्रयुज्यते ॥ २१ ॥
आत्मा यत्ने धृतौ चित्ते बुद्धौ शीलशरीरयोः ।
विरिञ्चेऽर्केऽनिले विष्णावार्यावृत्ते च मातरि ॥ २२ ॥
दुर्गायां च भवेदास्यं मुखे मुखबिले रदे ।
आज्यं घृते च श्रीवासेप्याप्तिः सम्बन्धलाभयोः ॥ २३ ॥
आशीरिष्टप्रशंसायां दंष्ट्रायां पवनाशिनां ।
आज्ञा निदेशे निर्देशे नृपादिशपथेऽपि च ॥ २४ ॥
आलिः पालिः सखीश्रेणीष्वनर्थे विमले द्रुणे ।
आराद्व्यवहिते दूरे समीपे विसर्गेऽव्ययम् ॥ २५ ॥
आप्तो लब्धे हिते सत्येप्यार्यः सुकृतपूज्ययोः ।
आगो मन्तावघे वाशा तृष्णायां ककुभिस्स्मृता ॥ २६ ॥
इला चन्द्रजभार्यायामुर्वीवाञ्चोर्गविश्रियां ।
इरा जलमहीमद्यसुवाणीष्वशनेऽपि च ॥ २७ ॥
इडा गविजले भूमौ स्वर्गनाड्योर्बुधस्त्रियां ।
इन्द्रो भूपे रवौ शक्रे योगभेदेन्तरात्मनि ॥ २८ ॥

---

20 — b) D शिक्षादौ for प्रधाने च. — c) D प्रधाना° for शिक्षाद्य°.

22 — c) AD विरञ्चे for विरि°; — d) C आर्य° for आर्या°.

23 — c) C जीवासे for श्रींवासे.

24 — b) D om. नृपादिश.

25 — a) ABD आलि° for पालिः.

26 — a) BD लब्धः for लब्धे; D सत्त्वे for सत्ये. — b) AB ऽहे बुद्धपूज्ययोः for सुकृत°. — d) C तृष्णा for तृष्णायां.

27 — b) C वाचो गवि for वाचोर्गवि. — d) D भारती for सुवाणी.

28 — a) C इष्टं तुदा (currupt?) for इडा. — b) D सर्ज्जं° for स्वर्ग°.

इष्टं तु वाञ्छिते पूज्ये यागे चेनः प्रभौ रवौ ।
इत्यव्ययं प्रकारादिसमाप्तिक्रमहेतुषु ॥ २९ ॥
इष्टिर्यागे च वाञ्छायामीहात्तृषि समुद्यमे ।
ईतिः प्रवासेऽजन्ये स्यादीशः शम्भौ क्षमे हरौ ॥ ३० ॥
उरो वक्षसि मुख्ये स्यादुग्रमुत्कटशर्वयोः ।
शूद्रायां क्षत्रियाज्जातेप्युषः सायंप्रभातयोः ॥ ३१ ॥
उमातसीशचीगौरीदुर्गाकीर्तिषु भाश्रियोः ।
भारत्युपमयोरुष्ट्रा मृद्भाण्डकरभस्त्रियोः ॥ ३२ ॥
ऊर्णलोमनिमेषस्य लोमावर्ते भ्रुवोन्तरे ।
ऊर्जो मासे बलेप्यूर्तिः रक्षणे च स्मृतावृतं ॥ ३३ ॥
सत्ये जले शिलोञ्छे स्यादृणं देयाम्बुदुर्गयोः ।
ऋतिर्घृणा गतिस्पर्द्धाकल्याणसुरमातृषु ॥ ३४ ॥
ऋक्षं धिष्ण्ये भवेदृक्षो भल्लूके स्यादृषिर्मुनौ ।
श्रुतावृतुवसंतादौ स्त्रीणां पुष्पेषु दृश्यते ॥ ३५ ॥
एनः पापे गदे मन्तावेकः केवलपूज्ययोः ।
एवं प्रकारे चौपम्ये एवौपम्येवधारणे ॥ ३६ ॥
ओजो बले गुणे धातुतेजोऽवष्टम्भदीप्तिषु ।
ओघो नृत्यान्तरे सङ्घे जलवेगोपदेशयोः ॥ ३७ ॥
कणाजीरकपिप्पल्योः कुणिः कुकरवृक्षयोः ।
कर्कः कर्कतने कुम्भे दर्पणानलराशिषु ॥ ३८ ॥
श्वेताश्वे कन्दुके काकं रतबन्धे च योषितां ।
काकवृन्देऽथ काकः स्यात् एकदृग्गृद्धुमभेदयोः ॥ ३९ ॥

---

29 — b) B योगे चेनः; C योगेर्चनः; D योगोचानः.
30 — a) D च for तु. — b) D समुच्चये for समुद्यमे. — c) D इतिः for ईतिः
31 — b) AB उग्रस्तूत्कट° for उग्रमुत्कट. — d) D विमातयोः.
34 — a) B °थ for °स्यात्. — b) D दुर्जयोः for दुर्गयोः.
35 — c) D श्रुतौ ऋतु. — d) D पुष्पे च; C पुष्पे.
37 — a) C धामे (?).

पङ्गौ मानेथ **काका** स्यात् काकोलीकाकजङ्घयोः ।
काकोदुम्बरिकाकाकमाचिकारक्तिकास्वपि ॥ ४० ॥
विहङ्गे काकनासायां **कुञ्जो** हनुनिकुञ्जयोः ।
मन्दिरे दन्तिनां दन्ते **कोकः** स्याद्वृकभेकयोः ॥ ४१ ॥
चक्रवाके च खर्जूरीद्रुमे **किष्कुस्तु** कुत्सिते ।
प्रकोष्ठे पञ्चशाखे च वितस्तौ प्रतिमण्ठके ॥ ४२ ॥
कचः शुष्कव्रणे बन्धे केशवाक्पतिपुत्रयोः ।
काचः शिक्ये मणौ वृक्षे नेत्ररोगे मृदीष्यते ॥ ४३ ॥
कच्छस्तटे तरण्यङ्गेनूपप्रायद्रुभेदयोः ।
कम्बुः स्याद्वलये शङ्खे कपर्दग्रीवयोर्गजे ॥ ४४ ॥
कर्चूरे नलके **कम्बिर्**दर्वीभूषाविशेषयोः ।
वंशवञ्ज्यां **करे** कर्मक्रियाकारकभेदयोः ॥ ४५ ॥
कञ्जो धातरि केशे स्यात्**कञ्जं** पीयूषपद्मयोः ।
कुजो महीसुते वृक्षे मण्ठके नरकासुरे ॥ ४६ ॥
कटुस्तिक्ते रसे निम्बप्रियङ्गुकटुकासु च ।
मत्सरेऽथ **क्रमः** शक्तिः परिपाटीप्रदेषु च ॥ ४७ ॥
कुटो गेहे शिलाकुट्टे वृक्षे कुम्भे **कठो** मुनौ ।
ऋग्भेदे वेदवित्पाठे **कण्ठस्तु** मदनद्रुमे ॥ ४८ ॥
संनिधाने गले घोषे **कीर्तिर्**यशसि कर्दमे ।
प्रासादे विस्तरे **क्रोडः** शनावुत्सङ्गकोलयोः ॥ ४९ ॥
कार्यं प्रयोजने हेतौ **कामी** तु कमनीयके ।
पारापते चक्रवाके **कृष्णं** मरिचलोहयोः ॥ ५० ॥

---

40 — a) D द्वीपे for पङ्गौ.
41 — a) D वृष for वृक.
44 — b) AC द्रूभेदयोः.
46 — b) C कज° for कञ्ज°.
47 — a) B निम्बे. — d) C om. पाटी; C पादेषु.
49 — a) C प्रसादे; AC विस्तृतौ.

कृष्णो वर्णे पिके विष्णौ व्यासे काकेर्जुने कलौ ।
कृष्णा तु पिप्पलीनील्योर्द्रौपदीहारदूरयोः ॥ ५१ ॥
कद्रुः सुवर्णवर्णे स्यात्कद्रूः पन्नगमातरि ।
कल्या कल्याणभारत्यां कल्यं मद्यप्रभातयोः ॥ ५२ ॥
सज्जे निरामये **केशः** पाशिन्यब्जे कचे सुरे ।
काशो रोगे तृणे काश्यं सोमे मद्यकशार्हयोः ॥ ५३ ॥
कुशः श्रीरामजे दर्भे पापिष्ठेऽपि **कुशं** जले ।
कुशी लोहविकारे स्यात्**कीशो** दिग्वसने कपौ ॥ ५४ ॥
कोशो दिव्येवने पेश्यां परिवारे च कुड्मले ।
जातीकोषे धनागारे चषके योनिशम्बयोः ॥ ५५ ॥
क्रिया तु निष्कृतावर्चाकर्मणोः संप्रधारणे ।
आरम्भोपायचेष्टासु क्रतौ शिक्षाचिकित्सयोः ॥ ५६ ॥
कान्तिः शोभेच्छयोश्चाथ **कन्तुः** कामकुशूलयोः ।
कान्तो रम्ये प्रिये **कान्ता** योपारेषाप्रियङ्गुषु ॥ ५७ ॥
कृतं फलेऽपि पर्याप्ते हिंसिते विहिते युगे ।
काव्यं ग्रन्थे च काव्योभे (?) ज्ञे **काव्या** पूतनाधियोः ॥ ५८ ॥
कालः वर्णे महाकाले समये मरणे यमे ।
काली नवाम्बुदे कीटे **कालिका** परिवादयोः ॥ ५९ ॥
कीलोऽग्नितेजसि स्तम्भे शङ्कौ **कीला** हतारतौ ।
कीर्णः क्षिप्ते हते छन्ने **कर्णो**ऽरित्रेऽर्कजे श्रुतौ ॥ ६० ॥
कूटाख्या शिखरे दम्भे तुच्छे निश्चलयन्त्रयोः ।
सीदाङ्गे नगरद्वारायोघनानृतराशिषु ॥ ६१ ॥
कामाख्यातिशये काम्ये वाञ्छायां मकरध्वजे ।
काञ्ची तु नगरीभेदमेखलारक्तिकास्वपि ॥ ६२ ॥

---

53 — a) C कश्यं.
55 — a) A दिव्यः.
60 — a) C अग्निः for अग्नि.
61 — c) D शीरांगे.

काण्डं बाणे क्षणे नाले संघश्लाघाधमेषु च ।
एकान्ते सलिले वर्गे स्तम्बे स्कन्धे च शाखिनाम् ॥ ६३ ॥
कुण्डः कुम्भ्यां जलाधारभेदे देवजलाशये ।
जाराज्जीवत्पतेः पुत्रे **क्रीडा** केल्यामनादरे ॥ ६४ ॥
कला काले च चन्द्रांशे शिल्पे च कलनांशयोः ।
अर्थवृद्धौ **कलं** स्पष्टे रुचिरे मधुरे स्वरे ॥ ६५ ॥
कुम्भो वेश्यापतौ राशौ करिकुम्भस्थले घटे ।
कोलं स्याद्बदरे **कोलो** भेके खञ्जे च सूकरे ॥ ६६ ॥
क्रौञ्चः शैले खगे द्वीपे **कलिः** स्यात्कलहे युगे ।
बिभीतकद्रुमे शूरेप्याजौ **कक्षस्तु** वीरुधि ॥ ६७ ॥
कच्छे शुष्कवने पापे बाहुमूले तृणेपि च ।
कक्षा बृहतिकोद्योगेभनाडीमेखलास्वपि ॥ ६८ ॥
कटः कलिञ्जे समये शवे शवरथे भृशे ।
दन्तिगण्डे क्रियाकारे कट्यां गण्डश्मशानयोः ॥ ६९ ॥
कल्पो न्याये विधौ शास्त्रे संवर्ते ब्रह्मवासरे ।
कल्पद्रुमे विकल्पेऽथ **कूपो** वाटेपि कूपके ॥ ७० ॥
मृन्माने तालभेदे स्याद्गर्तेऽब्धौ गुणवृक्षके ।
काष्ठा दिशि प्रकर्षे भूकालमाननिशासु च ॥ ७१ ॥
कारा प्रसेविके हेमकारिकाबन्धशालयोः ।
करो मेघोपले दन्तिशुण्डाप्रत्यायपाणिषु ॥ ७२ ॥
किरणे करणे चाथ **कुष्टं(ष्ठं)** भेषजरोगयोः ।
कुलं स्वजातिसन्दोहे समूहे देहगेहयोः ॥ ७३ ॥

---

64 — c) D जीवत्पिते°. — d) B केल्यप्रयत्नयोः.

65 — d) D om. मधुरे.

66 — a) AC जिनांतरे for वेश्यापतौ. — b) BD गजांगे राक्षसे for करिकुम्भस्थले. — c) D कोलं तु.

67 — b) D कलिस्तु. — c) D सुरे for शूरे.

69 — b) D शावे. — c) B transp. दंतिगंडे and क्रियाकारे.

70 — b) D संवर्त°.

71 — c) C प्रकर्षे च.

कायः कदैवते देहे लक्ष्ये सङ्घस्वभावयोः ।
कूर्चो विकत्थने दम्भे श्मश्रुणि स्याद्भ्रुवोन्तरे ॥ ७४ ॥
कष्टं तु गहने कृच्छ्रे **कृष्टिर्धी**मति कर्षणे ।
कोष्ठं निजे कुशूले च कुक्षावन्तर्गृहस्य च ॥ ७५ ॥
कूलं स्तूपे तटे सैन्ये सरस्यग्रनितम्बयोः ।
केतुर्ग्रहे पताकायां कलङ्कोत्पातयोस्त्विषि ॥ ७६ ॥
कोटिरग्रे च संख्यायामटन्याधिक्ययोः फले ।
कन्दोऽब्दे सूरणे मूले **कुन्दो** यन्त्रे निधौ द्रुमे ॥ ७७ ॥
कोथस्तु शटिते नेत्ररुग्भेदे मथनेपि च ।
कुथस्तालान्तरे दर्भे प्रातःस्नानरतद्विजे ॥ ७८ ॥
रोगे कीटभिदि स्यादास्तरणे करिकम्बले ।
कन्था पुरे प्रावरणे **कविः** शुक्रे विधौ मुनौ ॥ ७९ ॥
हयोपकरणे वाचस्पतिवाग्गुम्फकारयोः ।
कङ्कस्तु लोहपृष्ठेपि यमे ब्राह्मणलिङ्गिनि ॥ ८० ॥
किल प्रश्ने वितर्के च प्रसिद्धौ पादपूरणे ।
वृत्तान्ते क्रीडने सत्ये **किमु** प्रश्नवितर्कयोः ॥ ८१ ॥
खरस्तु गर्दभे तिग्मे दुःस्पर्शे कोणपान्तरे ।
खरुस्तुरङ्गमे दर्पे रुद्रदन्तसितेषु च ॥ ८२ ॥
खल्लो निम्ने खगे वस्त्रे त्वचि **खल्ली** गदान्तरे ।
खलः स्यात् खलके ताले पिण्याके राशिनीचयोः ॥ ८३ ॥
खर्जूरिक्षुविशेषे स्यात्कण्डूकीटविशेषयोः ।
खर्जूरी भूरुहे चाथ **खर्वो** ह्रस्वे च वामने ॥ ८४ ॥

---

74 — c) A om. दम्भे.
75 — d) D om. कृच्छ्रे; cf. *Vyākhyāsudhā* on *Amara* 1. 9. 4.
76 — b) CD सरोवर° for सरस्यग्र°.
77 — b) A अधिक°; D अधिक्य°.
78 — a) C कटिते for शटिते.
82 — b) BC राक्षसांतरे. — d) C शर्व for रुद्र.
83 — a) C खलः. — c) C om. खलः स्यात्.
84 — c) D पादपे for भूरुहे;

खेटोधमे कफे ग्रामे दुर्नेताराम्रृगव्ययोः ।
खेटस्तृणे प्रहारे स्यात्कफेटङ्कान्धकूपयोः ॥ ८५ ॥
खाटिः किणे शवरथे **खण्डो**ऽर्द्धमणिदोषयोः ।
ऐक्षवेऽथ **खगो** मेघे ग्रहेऽर्के पक्षिबाणयोः ॥ ८६ ॥
देवे **खङ्गः(ड्ग)** कृपाणे स्यात्खाङ्गि(ड्गी)शृङ्गेपि गण्डके ।
खलु वारणजिज्ञासावाक्यभूषासु सान्त्वने ॥ ८७ ॥
गौरी गोरोचनीपाशिपत्नीचण्डीप्रियङ्गुषु ।
पौर्णमासीमहानद्योरप्रसूतस्त्रियां निशि ॥ ८८ ॥
गुडः कुञ्जरसन्नाहे गोलकेक्षुविकारयोः ।
गुडा स्नुहीगुटिकयोर्गौडं स्याद्गुडनाभिके ॥ ८९ ॥
पामरेथ **गजो** माने द्विपे **गञ्जा** सुरागृहे ।
गञ्जो भाण्डगृहे रीढाखन्योर्गुञ्जा कलध्वनौ ॥ ९० ॥
पटहेपि लताभेदे **गोष्ठं** गोस्थानके स्मृतं ।
तालान्तरे वने **गोष्ठी** संलापे परिषद्यपि ॥ ९१ ॥
गण्डस्तु गण्डके योगे कपोले खनिचिह्नयोः ।
गन्धो गर्वे गन्धके चामोदे सम्बन्धलेशयोः ॥ ९२ ॥
गोपो योगीश्वरे भूपे बल्लवे ग्रामयुक्तके ।
गुरुर्जीवे च पित्रादौ दुर्जरे महति क्षमे ॥ ९३ ॥
निषेकादिकरे **गौर**श्चन्द्रे पीतेरुणे सिते ।
कर्पूरे निर्मले **गौरं** किञ्जल्के श्वेतसर्षपे ॥ ९४ ॥

---

86 — Cf. *Haimakośa* 2. 48d for 86a.

87 — d) D शांत्तये, C (corrupt) सांवने. — For 87cd cf. *Medinī* 'खलु स्याद्वाक्यभूषायां जिज्ञासायां च सांत्वने'.

88 — b) C चंद्र for चंडी; — d) D reads °कुलस्त्रियां for °स्त्रियां निशि.

89 — a) BC कञ्जर° for कुञ्जर°; for 89ab cf. *Medinī* 'गुडः स्याद्गोलके हस्तिसंनाहेक्षुविकारयोः'. — c) BC स्नुहा for स्नुही; A गुडिकयोः; for 89c Cf. *Rudra*-'स्नुही गुडिकयोर्गुडा' quoted by Bhānūji Dīkṣita in his ***Vyākhyā-sudhā*** on *Amara* 2. 4. 105.

91 — b) D गोस्थानकं.

92 — For cd cf. *Haima* 'गन्धः संबंधलेशयोः । गन्धकामोदगर्वेषु'.

94 — b) D चांद्रे.

गुणो भीमे हृषीके ज्यारज्जुशौर्यादितन्तुषु ।
सूदे प्रधाने सन्ध्यादौ निर्दोषे रूपसत्त्वयोः ॥ ९५ ॥
गोधा जीवविशेषे स्याद्वप्रे(C °प्र) ज्याघातवारणे ।
गोत्रो महीधरे **गोत्रं** सम्भाव्यबोधवर्त्मनोः ॥ ९६ ॥
छत्रेऽरण्येऽन्वये नाम्नि क्षेत्रे **गोत्रा** गवां गणे ।
भूमौ चाथ **गिरि**र्गर्भे कन्दुके पूज्यशैलयोः ॥ ९७ ॥
नेत्ररोगे तरोः सारे **गाथा** वाग्भेदवृत्तयोः ।
गुच्छः कलापे हारे स्यात्स्तम्बस्तबकयोरपि ॥ ९८ ॥
गर्भः सन्धौ बले कुक्षौ बाले पनसकण्टके ।
मध्ये **ग्रामः** पुनः शब्दात् संघे संवसथे स्वरे ॥ ९९ ॥
ग्रहस्तु ग्रहणेऽर्कादौ निर्बन्धेऽपि **गणो** बले ।
सैन्यान्तरे समूहे स्यात्संख्यायां प्रथमेपि च ॥ १०० ॥
गुल्मो विकारे सेनायां वृक्षघट्टविशेषयोः ।
गतिर्ज्ञानेपि यात्रायामुपायदशयोः पथि ॥ १०१ ॥
ग्रस्तं ग्रासीकृते गुप्ते विलुप्तपदजल्पिते ।
गदा शस्त्रे **गदो** रोगे वासुदेवानुजे स्मृतः ॥ १०२ ॥
गुप्तिः कारागृहे गुप्तरक्षयोरन्तके यमे ।
गोप्यो दासीसुते गूढे **गुहः** स्कन्दे च गह्वरे ॥ १०३ ॥
घनः स्यात्कर्कशे मेघे विस्तारे मुस्तकाङ्गयोः ।
बहुले मुद्गरे मन्दे वृन्दवाद्यविशेषयोः ॥ १०४ ॥

---

95 — c) D संख्यादौ.

96 — d) D वर्त्मनि.

97 — b) C गोत्र for गोत्रा ; — c) D भेदे for गर्भे.

99 — c) D read जठरात्मावथ ग्रामः for c.

101 — b) D वृक्षातंक° for वृक्षघट्ट°.

102 — b) D °वक्करि for °जल्पिते.

104 Before 104 C adds अथ घादयः शब्दा उच्यन्ते. — a) BDC घनाख्या; — c) A मध्ये for मन्दे.

घर्मः स्यादातपे तापे ग्रीष्मोष्मस्वेदवारिषु ।
घोषो गोपरवाभीरपल्लीकांस्येषु घोषके ॥ १०५ ॥
घृतं क्षीराज्यदीप्तेषु **घृणा** दयाजुगुप्सयोः ।
घटा गोष्ठीघटनयोर्दन्तिसंघट्टनेपि च ॥ १०६ ॥
घटो दन्तिशिरःकूटे समाधौ कलसे लसे (?) ।
घोण्टा तु बदरे पूगे **घृणिर्**ज्वालांशुवीचिषु ॥ १०७ ॥
चण्डा धनहरीशङ्खपुष्प्योश्**चण्डी** शिवस्त्रियां ।
चण्डोऽतिकोपने तिग्मे यमदासेऽसुरान्तरे ॥ १०८ ॥
चक्रं वृन्दे जलावर्त्ते रथाङ्गे बलराष्ट्रयोः ।
दुष्टे दम्भान्तरे शस्त्रे **चक्रः** कोकविहङ्गमे ॥ १०९ ॥
चित्रा दन्त्यां सुभद्रायां नक्षत्रौषधिभेदयोः ।
दिव्यस्त्रीसर्पयोराखुपर्ण्यां च **चित्र**मद्भुते ॥ ११० ॥
कर्बूरे तिलकेपि स्यादालेख्ये नभसो(सि) रसौ ।
चन्द्रः सुवर्णे कर्पूरे मेचके रजनीपते ॥ १११ ॥
कम्पिल्ये सलिले काम्ये **चौरो**पि दस्युसुगन्धयोः ।
चीरं तु गोस्तने वस्त्रे चूडायां सीसपत्रके ॥ ११२ ॥
चर्चा देव्यां च चिन्तायां निन्दास्थासकयोरपि ।
चक्री कृष्णे रथे कोके कुलाले चक्रिघूरगे ॥ ११३ ॥
छदः पत्रे पतत्रे स्याद्ग्रन्थिपर्णतमालयोः ।
छिद्रं तु विवरे व्याजे व्यक्ते दूषणगर्त्तयोः ॥ ११४ ॥

---

105 For घर्मः cf. Bhānūji Dīkṣita on *Amara* 1. 7. 33. quoting a passage: 'घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्बुनोरपि'.

106 — b) D माया for दया.

108 For चण्डा cf. *Medinī*, 'चण्डा धनहरीशङ्खपुष्प्योस्त्रिष्वतिकोपने । तीव्रेऽपि'.

110 — b) CD दंती न(c ना°) क्षत्र° (c *marg. sec. m.* दांती) for नक्षत्रौषधि°; — d) C पर्ण्यै for पर्ण्यां.

112 — b) B चौरस्तु for चौरोपि; AB om. सु before गन्धयोः.

114 — For 6 cf. Bhānūji Dīkṣita's quotation on *Amara* 2. 4. 14 'ग्रन्थिपर्णतमालयोः'.

छन्दो वशेऽप्यभिप्राये **छन्दः** पद्येच्छयोः श्रुतौ ।
छाया प्रतितनावालीशोभयोरर्कयोषिति ॥ ११५ ॥
उत्कोचे नातपे कान्तौ पालनेऽपि तमस्यपि ।
छल्ली द्रुवल्कले पुष्पविशेषे वीरुधीष्यते ॥ ११६ ॥
सन्तानेथ **छलं** पत्रे स्खलिते व्याजवेषयोः ।
छेको मृगान्तरे दक्षे विश्वस्ते नीडजे स्मृतः ॥ ११७ ॥
ज्येष्ठः स्यादग्रजे मासे पूज्ये पूज्यतरेपि च ।
ज्येष्ठा तु गृहगोधायां नक्षत्रौषधिभेदयोः ॥ ११८ ॥
जडो मूर्खे हिमग्रस्ते **जिष्णुः** शक्रेऽर्जुने हरौ ।
वसुष्वपि रवौ रामे जयशीलेऽमरद्रुमे ॥ ११९ ॥
जनी वध्वां **जनो** लोके जगद्भेदे पृथग्जने ।
जटा केशविकारे स्यान्मांसीपादपमूलयोः ॥ १२० ॥
ज्योतिर्दिनाधिपे वह्नौ नक्षत्रेऽक्षिप्रकाशयोः ।
जातिश्छन्दसि मालत्यां सामान्ये जन्मगोत्रयोः ॥ १२१ ॥
आमलक्यामथ **ज्यायान्**प्रशस्येऽतिशये गुरौ ।
जालं दम्भे गणानायक्षारकेष्वपि जालके ॥ १२२ ॥
जालो नीपे नटे **जाली** पटोल्यां च **जलं** जडे ।
तोये **जिह्मो**ऽसमे मन्दे **जिह्मं** तगरभूरुहे ॥ १२३ ॥
जगत्स्याज्जङ्गमे लोके **जामिः** स्वसृकुलस्त्रियोः ।
जम्भो दन्तेऽशने चांशे दैत्ये तूणे हृतौ तरौ ॥ १२४ ॥
जिनस्त्वर्हति बुद्धे स्याद्देवकीनन्दने स्मरे ।
झूणिः पूगीफले दण्डे दुष्टदैवश्रुतावपि ॥ १२५ ॥
टङ्कोऽश्मदारणे कोपे मानभेदखनित्रयोः ।
कोशोऽपि टङ्कणक्षारे **जङ्घा** नीलकपित्थयोः ॥ १२६ ॥

---

115 — a) D छंदः श्रुतौ for छंदः वशेऽपि ; — b) D गायत्र्यादौ वशे स्मृतं.
118 — cd) Cf. *Medinī* 'ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः'.
120 For ab D reads 'जनो लोके जगद्भेदे समूहेऽपि पृथग्जने' ; — d) C पादमूलयोः.
126 — b) D मानभेदे for मानभेद.

डिम्भः मूर्खे शिशौ **डिम्बः** डमरे पुप्फ(प्फु)से भये ।
त्राणं तु रक्षणे वीर्ये त्रायमाणौषधेपि च ॥ १२७ ॥
तर्को विचारे काङ्क्षायामूहकर्मविशेषयोः ।
तलश्चपेटे तालद्रौ **तलं** चाधःस्वभावयोः ॥ १२८ ॥
तालो गीतक्रियामाने करास्फोटद्रुभेदयोः ।
हस्तमानेऽपि पाताले **तालं** तु हरितालके ॥ १२९ ॥
तारो गाढध्वनौ मुक्ताशुद्धौ निर्मलमौक्तिके ।
नेत्रमध्ये तथोद्गीते भे **तारं** रजते स्मृतम् ॥ १३० ॥
तारा गुरोः स्त्रियां बुद्धदेवीसुग्रीवभार्ययोः ।
तीर्थं तु देवतास्थाने तोयोपाध्यायसत्रिपु (मन्त्रिपु ?) ॥ १३१ ॥
उपाये रजसि स्त्रीणां योनौ पात्रावतारयोः ।
ऋषिजुष्टे मखे पुण्यक्षेत्रदर्शनयोरपि ॥ १३२ ॥
त्रपुः स्यात्सीसके वङ्गे **तन्त्रं** पवनसाधने ।
सिद्धौषधे सुखे जातौ सिद्धान्ते देशसेनयोः ॥ १३३ ॥
प्रधानेऽपि परच्छन्दे करणेऽपि परिच्छदे ।
वेदशाखान्तरे तन्तुशास्त्रयोरर्थसाधके ॥ १३४ ॥
तन्त्री वीणागुणे नाड्याममृतासरितोरपि ।
त्यागो दाने परित्यागे **तीरो** वङ्गे तटे शरे ॥ १३५ ॥
तुला पलशते माने सादृश्ये राशिभाण्डयोः ।
तमः शोके तमिस्रे च गुणभेदे विधुंतुदे ॥ १३६ ॥
तोकं पुत्रे च सन्ताने **तापः** सन्तापकष्टयोः ।
तीक्ष्णं तिग्मे विषे लोहे समुद्रलवणे युधि ॥ १३७ ॥

---

127 — for ab D reads 'डिह्मस्तु विप्लवे प्लीहे रोगे बालकमूर्खयोः' ।; — d) Cf. *Haimakośa* 'त्रायमाणौषधावपि'.

128 — ab) Cf. *Haimakośa* 'तर्कः वितर्के कांक्षायामूहकर्मविशेषयोः' ।. — c) Cf. *Haimakośa* 'तलश्चपेटे तालद्रौ' ।.

130 — b) B बुद्धौ for शुद्धौ.

131 — b) B बुद्धदेव for °देवी ; C reads देव्यांभेषु कपिस्त्रियाम् for

132 — c) c पुण्ये for पुण्य.

137 — d) A संतापकोष्ठयोः.

तेजो वह्नौ बले मोक्षे नवनीतप्रभावयोः ।
रेतप्रकाशयोस्तीक्ष्णे तूणी नीलीनिषङ्गयोः ॥ १३८ ॥
तल्पं तु सदने देहे वस्त्रे शय्याकलत्रयोः ।
तनुः सूक्ष्मे कृशे देहे वामने विरलत्वचोः ॥ १३९ ॥
तिक्ता च कटुरोहिण्यां तिक्तो गन्धे रसान्तरे ।
त्रुटिस्तु संशये रज्जौ कालमाने लवेलयोः ॥ १४० ॥
तरो वेगे बले त्रेता युगभेदेऽनलत्रये ।
ततं तु विपुले वाद्ये त्रयीवेदत्रये त्रये ॥ १४१ ॥
तार्क्ष्यः खगेश्वरे सूरसूते स्यन्दनवाजिनोः ।
अश्वकर्णद्रुमौषध्योस्तन्द्री निद्राप्रमादयोः ॥ १४२ ॥
द्युतिः शोभाकिरणयोर्दन्तो रदनसानुनोः ।
द्रुतं शीघ्रे गते लीने दाढा दंष्ट्राभिलाषयोः ॥ १४३ ॥
दृढो मत्ते भृशे शक्ते दोग्धा गोपालवत्सयोः ।
द्रोणः कृपीपतावद्रौ संख्यायां वृद्धवायसे ॥ १४४ ॥
द्रोणी च शैलसन्धौ च नौविशेषे द्रुणः शरे ।
कीटे भृङ्गे द्रुणं चापे कृपाणे कच्छपान्तरे ॥ १४५ ॥
दायः पितृधने दाने यौतकादिधनेऽन्वये ।
दण्डी दण्डधरे भिक्षौ प्रतीहारे यमे नृपे ॥ १४६ ॥
दण्डः सैन्ये दमे माने प्रकाण्डे लकुटे यमे ।
मध्यर्कानुचरे दर्पे चतुर्थोपायकोणयोः ॥ १४७ ॥
दीप्तं निर्भासिते दग्धे दीक्षा यजनपूजयोः ।
दक्षः प्रजापतौ ताम्रचूडे रुद्रवृषे पटौ ॥ १४८ ॥

---

138 — c) C तीव्रे for तीक्ष्णे; D om. तीक्ष्णे; D योधनीले for तूणी नीली.
139 — d) D विरलत्वचे.
140 — a) Cf. *Haimakośa* 'तिक्ता तु कटुरोहिण्यां' ।; — c) BC हीने for रज्जौ.
141 — d) C त्रयः for त्रये.
144 — c) B पार्थगुरौ for कृपीपतौ.
146 — a) D दायं.

दानं दन्तिमदे त्यागे खण्डनावनशुद्धिषु ।
दरो गर्वे मनागर्थे भये **देवो** नृपे सुरे ॥ १४९ ॥
जिगीषुबालयोर्मूर्खे मेघेऽपि व्यवहर्तरि ।
देवं जले हृषीकेऽथ **दिवं** घस्रे खनाकयोः ॥ १५० ॥
द्विजो दन्तेऽण्डजे विप्रे वैश्येऽपि क्षत्रिये **द्रुमः** ।
कल्पद्रुमे तरौ रत्ने **दिष्टिश्चा**नन्दमानयोः ॥ १५१ ॥
धनुर्धनुर्द्धरे राशौ पियालद्रुमचापयोः ।
धाम स्थाने गृहे देहे प्रभावे जन्मतेजसोः ॥ १५२ ॥
धाना भृष्टयवेऽङ्कूरधन्याकचूर्णसक्तुषु ।
धेनोऽब्धौ च **धुनी** नद्यां **धनं** वित्ते च गोधने ॥ १५३ ॥
धातुः शब्दादिवर्णाद्यो रश्मभेदेऽपि तद्गुणे ।
कफादौ च क्षुरादौ च महाभूतेऽपि कीकसे ॥ १५४ ॥
धाराऽस्यङ्गे चमूवक्त्रराजिवाजिगतेषु च ।
जलादिपाते संतत्यां प्राधान्येऽथ **धरो** गिरौ ॥ १५५ ॥
कूर्मे तूले **धरा** मेदे भुवौ गर्भाशयेऽपि च ।
धिष्ण्यं वह्नौ गृहे रश्मौ स्थाने भे बलशुक्रयोः ॥ १५६ ॥
धात्री धरित्र्यां धातक्यामामलक्यामुपमातरि (?) ।
धृतिर्धैर्ये च सन्तोषे धारणे चाध्वरे सुखे ॥ १५७ ॥
धन्वः स्थले च कोदण्डे **धन्वा** तु मरुमण्डले ।
धन्वी धनुर्द्धरे वृक्षे च्छेके मध्यमपाण्डवे ॥ १५८ ॥
ध्रुवश्च निश्चलौत्तानपादिकीलकशम्भुषु ।
धुतं धूते परित्यक्ते **धवो** भीरौ तरौ प्रिये ॥ १५९ ॥

---

151 — d) BC तु **for** च. **After 151 C reads :** धनुर्दंशः सर्पकवे कोपे नाशे वृषलभृत्ययोः । धीवरे दानपात्रे च दस्युः प्रत्यर्थिचौरयोः ॥.

153 for 153ab cf. ***Haimakośa*** **:** 'धाना भृष्टयवेऽङ्कूरे धान्याके चूर्णसक्तुषु' ।;
— a) C जवांकुर **for** यवेंकूर. **— b) C** धन्या **for** धन्याक.

156 For 156ab CD read कच्छपाधिपतौ तूले धरा मेदे भुवीष्यते ।

157 — b) B आमलक्योः **for** आमलक्यां.

159 — a) C om 159 a.

धेनुर्गवि च हस्तिन्यां ध्वांक्षः स्याद्बककाकयोः ।
याचके सदने धीदा सेमुखी कन्ययोरपि ॥ १६० ॥
ध्वजश्चिह्ने पताकायां शिश्ने पूर्वदिशो गृहे ।
खट्वाङ्गे शौण्डिके माने धाता पालकवेधसोः ॥ १६१ ॥
निजः स्वकीये नित्येऽथ नीतिः प्राप्तौ नयेऽपि च ।
नाडी कुहनचर्यायां नालिका गण्डदूर्वयोः ॥ १६२ ॥
स्नायौ गुणान्तरे नाले नीडं स्थाने खगालये ।
न्यङ्कुर्मुनौ मृगे ताले नखः करजषण्डयोः ॥ १६३ ॥
नागं रङ्गे तथा सीसपत्रेऽपि करणान्तरे ।
नागस्तु कुञ्जरे सर्पे मुस्तके नागकेसरे ॥ १६४ ॥
देहवायुविशेषे स्यात् श्रेष्ठे शब्दोत्तरस्थितः ।
पुंनागे जलदे नागदन्ते दुष्टाशयेऽपि च ॥ १६५ ॥
नाकः स्वर्गेऽन्तरिक्षे च नाकुः शैले मुनीश्वरे ।
वल्मीके विवरे नीचः पामरे वामने स्मृतः ॥ १६६ ॥
निष्को हृद्भूषणे साष्टसुवर्णशतकर्षयोः ।
सुवर्णे तत्पले च स्याद्दीनारस्नानयोरपि ॥ १६७ ॥
नभो मासे बिसे घ्राणे प्रावृषि स्यान्नभोऽम्बरे ।
नेत्रं वस्त्रे मृगे वृक्षमूलेऽक्षिणि गुणान्तरे ॥ १६८ ॥
नाभिः क्षत्रियचक्रान्तःप्राण्यङ्गेषु नृपोत्तमे ।
नदोऽब्धौ च ह्रदे वाहे रावे नन्दिर्गणान्तरे ॥ १६९ ॥
द्यूते चानन्दने नन्दी वटे शंकरवेत्रिणि ।
गर्दभाण्डेऽथ निन्दा स्यात्तथा कुत्सापवादयोः ॥ १७० ॥

---

161 — ab) Cf. *Haima* 'ध्वजः पूर्वदिशो गृहे । शिश्ने चिह्ने पताकायां खट्वाङ्गे शौण्डिकेपि च'।

162 — b) BC नये श्रुते for नयेपि च.

163 — a) C om. स्नायौ; — c) D transp. मुनौ and मृगे.

165 — d) B (अ)म्बुजे for पि च.

168 — d) D चाक्षिण for (अ)क्षिणि; BC दृशि for (अ)क्षिणि.

169 — b) C नृपांतरे.

नन्दा तिथ्यन्तरे विन्ध्यान्मणिके वाचि संपदि ।
नीलो वर्णे मणौ शैले कपिभिन्निधिभेदयोः ॥ १७१ ॥
नेमो गर्त्तेऽवधौ काले प्राकारे कैतवार्द्धयोः ।
नेमिः प्रधौ जिने वृक्षे **नालं** काण्डमृणालयोः ॥ १७२ ॥
नलं पद्मे **नलो** भूपे पितृदैवे नडे कपौ ।
नरः कृष्णेऽर्जुने रामे कर्पूरे पुरुषे **नतः** ॥ १७३ ॥
तगरे बन्धुरे भुग्ने **निभो** व्याजसमानयोः ।
नगो महीरुहे शैले **नूनं** तर्के विनिश्चिते ॥ १७४ ॥
नाम प्राकाश्ये कुत्सायां संभाव्ये स्वीकृतेऽव्ययम् ।
ननु प्रश्नेऽप्यनुज्ञायां संबुद्धाववधारणे ॥ १७५ ॥
पदं स्थाने क्रमे त्राणे पादचिह्नापदेशयोः ।
व्यवसाये विभक्त्यन्ते शब्देऽङ्के वाक्यवस्तुनोः ॥ १७६ ॥
पादो मूलेऽङ्कुरे रश्मौ पदे प्रत्यन्तपर्वते ।
तुर्यांशे कटके **पीथो** मार्त्तण्डे **पीथ**मम्भसि ॥ १७७ ॥
पद्मः संख्यानिधिव्यूहाहिषु **पद्मं** तु पल्लवे ।
अब्जे कुञ्जरबिन्दौ च **पद्मा** लक्ष्मीवरस्त्रियोः ॥ १७८ ॥
प्लवः प्लक्षे प्लुतौ भेके चण्डाले कुलके कपौ ।
क्रमनिम्नमहीभागे भेलके जलवायसे ॥ १७९ ॥
शब्दे कारण्डवे स्नाने **प्लवं** मुस्तकभिद्यपि ।
तोये गन्धतृणे **पुष्पं** विमाने धनदस्य च ॥ १८० ॥
प्रसूने रजसि स्त्रीणां विकाशे नयनामये ।
पाशः शस्त्रौघयोः शब्दान्मृगादीनां च बन्धने ॥ १८१ ॥

---

172 — b) BC (अ)र्द्धे च कैतवे for कैतवार्द्धयोः.
173 — c) BCD राम for रामे. — d) D रगृतः for नतः.
174 — a) D नतं च for तगरे; B नभ्रे for भुग्ने; — d) BC तर्केपि for तर्के वि°.
176 — a) D परि for क्रमे; — b) पदे चिह्नाप°.
178 — c) C अज्जे for अब्जे.
179 — b) C चंडाकुले for चंडाले. — d) ABC बाल° for जल°.
180 — b) C तु मुस्तकांतरे.
181 — a) C प्रसुते. — c) D reads यशेस्तु शोभने संघे for 181c.

पक्षो वर्गे ग्रहे पिच्छे पार्श्वे पक्ष्मविरोधयोः ।
केशात्परश्चये चुल्लीरन्ध्रे साध्यसहाययोः ॥ १८२ ॥
मासार्द्धेऽथ **पणो** द्यूताद्युत्सृष्टव्यवहारयोः ।
भृतौ कार्षापणे वित्ते ग्लहे गण्डकविंशतौ ॥ १८३ ॥
मूल्ये विक्रय्यशाकादिबद्धमुष्टौ नदे क्वचित् ।
पाकः पक्तौ शिशौ दैत्ये **प्रीतिः** प्रेमप्रमोदयोः ॥ १८४ ॥
पालिः सेतौ ततौ कर्णपाल्यां कल्पितभोजने ।
सश्मश्रुवर्तितोत्सङ्गप्रस्थेषु स्तुतिचिह्नयोः ॥ १८५ ॥
पत्रं तु च्छदने पक्षक्षुरीभूर्जेषु वाहने ।
पात्रं तु भाजने योग्ये देहे कूलद्वयान्तरे ॥ १८६ ॥
पत्री श्येने खगे बाणेऽद्रौ रथे **पोत्र**मम्बरे ।
मुखाग्रे क्रोडहलयोः **पीलुः** पुष्पे मतङ्गजे ॥ १८७ ॥
परमाणौ तरौ काण्डे **पुल**स्तु पुलके पृथौ ।
प्रस्थो माने तटे सानौ पृथुर्विस्तीर्णभूपयोः ॥ १८८ ॥
पुरं तु मन्दिरे देहेद्रंग (?) पाटलिपुत्रयोः ।
पुरस्तु गुग्गुले दृष्टः **पुरु**र्नृपपरागयोः ॥ १८९ ॥
प्रचुरे नाकिनां लोके **पारी** पात्रीपरागयोः ।
पूरे कर्करिकायां च करीणां पदबन्धने ॥ १९० ॥
पुङ्खस्तु मङ्गलाचारे बाणाङ्गश्येनयोरपि ।
प्राणोऽनिले बले गन्धरसे हृदयमारुते ॥ १९१ ॥
प्राणास्तु जीविते **पार्ष्णिः** पादमूलोन्मदस्त्रियोः ।
चमूपृष्ठे च कुम्भ्यां च **पुस्तं** लेप्यादिकर्मणि ॥ १९२ ॥
शिल्पेऽपि पुस्तके **पूर्त्तं** खातादौ पूरिते **पृषत्** ।
मृगे बिन्दौ **प्लुतं** वाजिगतौ **प्लुत**तस्त्रिमात्रके ॥ १९३ ॥

---

186 — c) B भोजने for भाजने.
187 — b) CD स्यंदने for (अ)द्रौ रथे.
190 — c) C पात्रं for पात्री.
191 — b) B शरांग for बाणांग.
193 — c) D प्लुवं for प्लुतं.

प्रायः स्यान्मरणे तुल्ये बाहुल्येऽनशनेऽपि च ।
पुण्ड्रस्तु चित्रके कीटे वासन्त्यामिक्षुभिद्यपि ॥ १९४ ॥
दैत्येऽपि तिलके पुण्डरीके **पुण्ड्रास्तु** निर्वृति ।
पशुर्मृगान्तरे मेषे यागादौ प्रथमे जडे ॥ १९५ ॥
पौषो मासान्तरे **पौषं** करणे क्षणयुद्धयोः ।
पत्तिः सैन्ये गतौ **पेशी** फलग्रन्थ्यसिकोशयोः ॥ १९६ ॥
पूगं पूगीफले वृन्दे **पयस्तु** क्षीरनीरयोः ।
पिङ्गं तु बालके पीते **पिङ्गा** गोरोचनामयोः ॥ १९७ ॥
पिण्डो बोले जपापुष्पे सिल्हेऽपि कवलाङ्गयोः ।
पिण्डं गेहैकदेशे स्यात् संघाते जीवनायसोः ॥ १९८ ॥
पीडार्चौ मर्दने वृक्षभिदुत्तंसकृपासु च ।
पण्डः षण्ढे शठे **पण्डा** दृष्टा तत्त्वधियामपि ॥ १९९ ॥
पाण्डुर्नृपान्तरे वर्णे मृद्विशेषे गदान्तरे ।
प्रेङ्खा वाजिगते नृत्यदोलापर्यटनेषु च ॥ २०० ॥
पिच्छं वाजे कचे **पिच्छः** पुच्छे **पिञ्जं** (ञ्जं ?) बले स्मृतम् ।
पिञ्जो व्यग्रे वधे **पिञ्जा** हरिद्रातूलयोरपि ॥ २०१ ॥
पुष्टिस्तु पोषणे वृद्धौ **पट्टः** पीठे चतुष्पथे ।
व्रणादिबन्धने **पेषो** पले भूपादिशासने ॥ २०२ ॥
प्रजा लोके च सन्ताने **पक्तिर्**गौरवपाकयोः ।
पल्लिर्जीविऽग्रकुट्योः **पलं** पिशितमानयोः ॥ २०३ ॥
पटू रोगविहीने स्यात्पटोले चतुरे स्फुटे ।
प्लक्षोऽश्वत्थे वटे द्वीपे गर्द्दभाण्डेऽपि पक्षके ॥ २०४ ॥
पर्व दर्शादिके ग्रन्थौ सिद्धान्तेऽवतरेऽन्तरे ।
विशेषे च पुराणाङ्गे प्रस्तावे मङ्गले तिथौ ॥ २०५ ॥

---

194 — b) D स्मृते (मृतौ ?) for पि च.

195 — d) B इंद्रिये for प्रथमे.

197 D inserts v. 197 after v. 199. — c) D पीते शिशो दृष्टं for तु बालके पीतं.

202 A adds v. 202 in margin (*sec, m.*).

फलं जातिफले हेतुकृते कङ्कोललाभयोः ।
त्रिफलाफलकैलासु **फालं** तु कुशिके गतौ ॥ २०६ ॥
फणा मन्थानकुण्डल्यां गोशृङ्गाहिमुखाग्रयोः ।
जटातृष्णामृतासु स्यात्**फटा** तु कपटे फणे ॥ २०७ ॥
भेकः भीरौ भरे मेघे मण्डूकद्रुमभेदयोः ।
भुजो बाहौ करे मूल्ये **भूकः** स्याच्छिद्रकालयोः ॥ २०८ ॥
भगो रूपप्रभावश्रीसौभाग्यज्ञानमुक्तिषु ।
यत्नेऽर्केन्दुयशःपुण्यैश्वर्येच्छावीर्ययोनिषु ॥ २०९ ॥
भङ्गस्तरङ्गे कौटिल्ये रुग्विशेषे पराजये ।
खण्डने भीतिविच्छित्त्योर्**भानुः** सूर्यदिनांशुषु ॥ २१० ॥
भृगुर्मृत्युञ्जये सानौ जमदग्निप्रतापयोः ।
शुक्रेऽपि **भोगस्तु** सुखे राज्ये वेश्याभृतावपि ॥ २११ ॥
फणेऽपि पालने वित्तेऽभ्यवहारादिदेहयोः ।
भाण्डं मूलवणिग्वित्ते भूषायामश्वमण्डने ॥ २१२ ॥
भ्रमो वारिभ्रमावर्त्तकुन्दयन्त्रेषु चार्जवे ।
भृङ्गस्तु भ्रमरे पिङ्गे भृङ्गराजे खगे त्वचि ॥ २१३ ॥
भेदो द्वैधे विशेषे स्यादुपजापविदारणे ।
भवो भद्रे शिवे सत्तासंसारप्राप्तिजन्मसु ॥ २१४ ॥
भावः स्वभावसत्तात्मलीलाकर्मविभूतिषु ।
योनौ जन्मबुधप्राणिचेष्टाभिप्रायवस्तुषु ॥ २१५ ॥
शृङ्गारादिनिदाने च शब्दावर्त्तमकारणे ।
भक्तिर्विभागे सेवायां **भक्तमन्ने** च तत्परे ॥ २१६ ॥
भद्रो रुद्रे वृषे दन्तिजातौ मेरुकदम्बके ।
साधौ रामचरे **भद्रं** करणे क्षेमभर्मयोः ॥ २१७ ॥
भर्मस्वर्णौ भृते भारे **भोगी** दर्वीकरे नृपे ।
वैयावृत्त्यकरे ताले ग्रामण्यां नापिते स्मृतः ॥ २१८ ॥

---

208 — d) D भूकस्तु for भूकः स्यात्.
211 — a) A भानौ for सानौ. — b) BD प्रपातयोः
218 — d) पि च for स्मृतः.

भूरिः स्यात्प्रचुरे भर्मे **भीरुः** कातरयोषयोः ।
भारो भरेऽपि संख्यायां **भरुर्भर्मणि** भर्त्तरि ॥ २१९ ॥
भीष्मस्तु भीषणे रुद्रे गङ्गापुत्रे हि रक्षसोः (सि) ।
भूभृन्महीधरे शेषे धरे **भूतिस्तु** संपदि ॥ २२० ॥
उत्पादे सदने मांसपाकभेदे च भस्मनि ।
भव्यं भाविनि कल्याणे योग्ये सत्ये फलेऽस्थिनि ॥ २२१ ॥
भीमो वृकोदरे रुद्रे रौद्रे भूपे भयानके ।
तथाम्लवेतसे **भौमो** मङ्गले नरकासुरे ॥ २२२ ॥
मुष्कोऽण्डे तस्करे सङ्घे मोक्षवृक्षेऽपि मांसले ।
मार्गो मेऽन्वेषणे मासाध्वनोरेणमदे हरौ ॥ २२३ ॥
मोघस्तु निःफले दीने **मोघा** स्यात्पाटलातरौ ।
मघा भे कुसुमस्यापि कलिकायामुदाहृता ॥ २२४ ॥
मेघोऽब्दे मुस्तके **मोचा** कदल्यां शाल्मलिद्रुमे ।
मानो गर्वे ग्रहे **मानं** प्रमाणे च पलादिषु ॥ २२५ ॥
महद्राज्येऽपि धीतत्त्वे पृथौ **मुक्ता** तु मौक्तिके ।
पुंश्चल्यामपि **मुक्तिस्तु** निर्वाणे मोचने स्मृता ॥ २२६ ॥
मूकोऽवाच्यसुरे दीने **मुखं** प्रारम्भपूज्ययोः ।
वदनोपाययोरग्रे मूले निःसारणेऽपि च ॥ २२७ ॥
मृगो नक्षत्रभेदे च मृगयागजभेदयोः ।
याञ्चायां च पशावेणे **मृगी** स्यान्नायिकान्तरे ॥ २२८ ॥
माया दम्भे दयाबुद्ध्योर्**मयो** वेसरदैत्ययोः ।
उष्ट्रे मायोच्युते (?) वस्रे **मयुरश्वमुखैणयोः** ॥ २२९ ॥
माता त्वमाप्रसूधेनुदुर्गाभूमातृकासु च ।
मल्लिस्तु करके मत्स्ये जिने जातीकपालयोः ॥ २३० ॥
मन्दो मूर्खे चरेऽभाग्ये रोगग्रस्ते शनैश्चरे ।
अलसे दन्तिनां जातौ **मुण्डो** मुण्डितशीर्षयोः ॥ २३१ ॥

---

231 d) — C om. मुंडः.

दैत्ये विधुंतुदे **मण्डः** शाके सारे च मस्तुनि ।
एरण्डपिच्छाभूषासु **मण्डा** चामलकीद्रुमे ॥ २३२ ॥
मौलिस्तु शेखरे शीर्षे शिखासंयतकोशयोः ।
मृतं च याचिते मृत्यौ **मृदुः** कोमल(अ)तीव्रयोः ॥ २३३ ॥
मधुर्मेघे जले क्षीरे दैत्ये मासवसन्तयोः ।
हारहू(हृ?)ररसे पुष्परसे यष्टिमधूकयोः ॥ २३४ ॥
मणिर्लिङ्गाग्रभागे स्यादजाकण्ठस्तने अमे ।
मणिके पद्मरागादौ निर्मलेऽपि भगध्वजे ॥ २३५ ॥
मरुद्वायौ सुरे **मीनो** राशौ मत्स्ये **मदो** रसे ।
मद्येभदानयोर्गर्वे वीर्ये कस्तूरिकामुदोः ॥ २३६ ॥
मित्रं सख्यौ च **मित्रोऽर्के मरुर्देशेऽपि** पर्वते ।
मारः स्मरे मृतौ विघ्ने **मोक्षो** निःश्रेयसि द्रुमे ॥ २३७ ॥
मरणे मोचने **माषो** धान्ये मानान्तरे शिशौ ।
त्वग्दोषे ज्ञातिभेदे च **मेषो** राश्यन्तरेऽप्यजे ॥ २३८ ॥
माला माल्ये ततो **मूलं** कुञ्जान्तिकशिफासुभे ।
आदौ **मन्थो** रवौ नेत्ररोगे मथि च सक्तुषु ॥ २३९ ॥
यवो धान्येऽङ्कुरेऽङ्गुष्ठरेखामध्ये कलान्तरे ।
नीलोत्पलविशेषे च स्वल्पे कर्णविशेषके ॥ २४० ॥
युगं युग्मे रथाद्यङ्गे वृद्धिनामौषधेऽपि च ।
पञ्चशाखचतुष्के च कृतादौ दिवसान्तरे ॥ २४१ ॥
योगो युक्तौ च संगत्यां कर्मणा लब्धलाभयोः ।
देहदार्ढ्यप्रयोगे च विष्कम्भादौ तथात्मनि ॥ २४२ ॥
उपाये भेषजे विद्भिर्दृष्टः संनहने धने ।
विश्रब्धघातिनि ध्याने युक्तिर्न्याये च योजने ॥ २४३ ॥

---

232 — b) CD पिच्छे for सारे. — d) CD तु for च.
241 — c) C स्यात् for च.
242 — d) D महा° for तथा°.

यज्ञो वैश्वानरे विष्णौ मखे चात्मनि शङ्करे ।
यष्टिर्दण्डे समाहाराम्लभागीमधुयष्टिषु ॥ २४४ ॥
यूथी तु मागधीपुष्पभेदयोश्च कुरण्टके ।
यानं युग्ये गतौ **योनिर्**भगे कारणताम्रयोः ॥ २४५ ॥
यतिर्भिक्षौ विरामे च **युतं** युक्ते पृथग्भवे ।
यन्ता सूते हस्तिपके **यक्षः** श्रीदेऽपि गुह्यके ॥ २४६ ॥
यमोऽहिंसासु ध्वाङ्क्षे संयमे यमजेऽन्तके ।
यमनेऽथ **यथा**शब्दोऽव्ययं तुल्ये निदर्शने ॥ २४७ ॥
राका स्पष्टरजःकन्यापौर्णमासिभिदोर्निशि ।
कच्छ्वां नद्यन्तरे **रेको** हीने शङ्काविरेकयोः ॥ २४८ ॥
रङ्कुस्तु कृपणे मल्ले **रेखा** स्यादल्पके च्छले ।
उल्लेखेऽपि तथा भोगे **रङ्कुः** संगीतयुधभुवोः ॥ २४९ ॥
रंगेऽपि **रङ्क**त्रपुणि **रागः** क्लेशादिके नृपे ।
मत्सरे लोहितादौ च गान्धाराद्यनुरागयोः ॥ २५० ॥
रोकं बिले चरे वेगे वारिक्रयणभेदयोः ।
रोकोऽशौ च **रुचिः** शोभास्पृहाभिष्वङ्गदीप्तिषु ॥ २५१ ॥
राजी तु पङ्क्तौ रेखायां **रुजा** त्वामयभङ्गयोः ।
रथः पदि शरीरे स्यात्स्यन्दने वेतसद्रुमे ॥ २५२ ॥
रीढावमाननागत्योः **राढा** देशान्तरे युतौ ।
रोही रोहीतके प्लक्षे वटवृक्षेऽपि पिप्पले ॥ २५३ ॥
राधा तु वध्यामलकी विष्णुक्रान्तासु सङ्करे ।
गोपीविद्युद्विशाखासु **राधो** वैशाष(ख)मासि च ॥ २५४ ॥
रमस्तु मन्मथे कान्ते रक्ताशोके **रमा** श्रियां ।
रुमा सुग्रीवभार्यायां लवणे लवणाकरे ॥ २५५ ॥

---

246 — a) D °दण्डधरे भिक्षे (क्षौ) for °भिक्षौ विरामे च; C transp. भिक्षौ an विरामे च. — c) Cf. *Amara* 3. 3. 59 'यन्ता हस्तिपके सूते'.
248 — c) D नदीभेदे भवेत् for कच्छ्वां नद्यंतरे. — d) D भीति for शंका.
251 — a) CD चिरे for चरे. — c) C रोकस्त्वंशौ for रोकांशौ च.
252 — b) Cf. *Haima* 'रुजा त्वामयभंगयोः'.
255 — d) CD रुमा स्यात् for लवणे.

रामो दाशरथे चारौ जामदग्न्ये हलायुधे ।
वृषान्तरे सिते श्यामे **रामा** सीतावरस्त्रियोः ॥ २५६ ॥
रसस्तु पारदे रागे शृङ्गारादौ घृतादिषु ।
गुणे द्रवे जले धातौ विषे वीर्ये **रसा** भुवि ॥ २५७ ॥
रथ्या मार्गे लताभेदे प्रतोल्यां रथसंहतौ ।
रक्तं तु रुधिरे रागिण्यरुणे कुङ्कुमे **रहः** ॥ २५८ ॥
एकान्ते मैथुने **रिष्टं** क्षेमाभावे शुभाशिषु ।
रूक्षोऽस्निग्धे कठोरे च **राष्ट्र**मुत्पातदेशयोः ॥ २५९ ॥
रूपं श्लोके पशौ नाटकादौ सौन्दर्यशब्दयोः ।
ग्रन्थावृत्तौ तथाकारे स्वभावे नाणके मृगे ॥ २६० ॥
राशिः समूहे मेषादौ **रश्मि**र्भासि च दोरके ।
रणो घोषे च सङ्ग्रामे **रत्न**मुत्कृष्टकाचयोः ॥ २६१ ॥
लेखस्तु दैवते लेख्ये **लेखा** पङ्क्तौ लिपावपि ।
लक्ष्मीः श्रीरिव शोभायां रमासंपत्प्रियङ्गुषु ॥ २६२ ॥
लघुर्मनोज्ञे निःसारे शीघ्रे चागुरुकृष्णयोः ।
लक्ष्यं तु वेध्ये संख्यायां **लक्ष**श्छद्मनि लक्ष्मणि ॥ २६३ ॥
लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च ।
लोकः प्रजाविष्टपयो**र्लेपो** जग्धौ विलेपने ॥ २६४ ॥
लिङ्गं चिह्ने शिवस्याङ्गे सांख्योक्तविकृतावपि ।
मेहने चानुमानेऽथ **लोलः** काङ्क्षान्विते चले ॥ २६५ ॥
लिप्तं भुक्ते विलिप्ते च **लाजा** (जः) स्यादार्द्रतण्डुले ।
लाजं तूशीरके **लाजा** भ्रष्टधान्ये स्युरक्षते ॥ २६६ ॥

---

259 — b) B क्षेमाभाव° for क्षेमाभावे; C °भावा° for °भावे.

262 — b) C लेख्या for लेखा. For लक्ष्मीः cf. *Vyākhyāsūdhā* on *Amara* 2. 8. 82 'लक्ष्मीः श्रीशोभासंपत्प्रियंगुषु'.

264 — b) C शाखिनी for शाकिनी.

266 b-d) Cf. *Medinī* लाजः स्यादार्द्रतण्डुले । नपुंसक मुशीरेऽथ स्त्रियां पुंभूम्नि चाक्षते' ।......; — b) BCD तंदुले. — c) D लाजा for लाजं. — d) B सृष्टधान्ये ; D भृष्टधान्ये.

वर्णो विप्रादिके कीर्तौ द्युतौ गीतक्रमे व्रते ।
शुक्लादिस्तुतिविशेषेषु चित्राक्षरकुथास्वपि ॥ २६७ ॥
अङ्गरागे गुणे रूपे भेदे तालान्तरे शरे ।
स्वर्णे **वर्णं** कुङ्कुमे तु स्याद्बाणो वृक्षान्तरे शरे ॥ २६८ ॥
शरस्यावयवे दैत्ये कथाकादम्बरीकृति ।
वाणिर्मेषे सरस्वत्यां व्यूतौ च क्रयविक्रये ॥ २६९ ॥
वेला सेवाङ्गुलिच्छेदे काले सिन्धुजलोन्नतौ ।
वित्तं विचारिते द्रव्ये **वीर्यं** तेजःप्रभावयोः ॥ २७० ॥
बले बीजे **वरो** वर्णे देवादेरीप्सिते वृतौ ।
जामातरि विटे श्रेष्ठे **वरं** तु वरचन्दने ॥ २७१ ॥
विधुर्नारायणे चन्द्रे **वज्रं** भिदुरहीरयोः ।
बाले **वेरं** शरीरे च वृन्ताके चन्दने जले ॥ २७२ ॥
वामी शृगालीवडवाकरभीरासभीषु च ।
वामः पयोधरे कामे प्रतिकूले महेश्वरे ॥ २७३ ॥
प्रशस्ये तालभेदे च **वामा** तु वरयोषिति ।
वारिः सरस्वतीघट्योर्दन्तिबन्धनमन्दिरे ॥ २७४ ॥
वृष्णिस्तु यादवे मेषे **वाजी** बाणे खगाश्वयोः ।
विद्धं भेद्ये च सादृश्ये **वपुः** शस्तशरीरयोः ॥ २७५ ॥
वाहो युग्ये वृषे मेध्ये वृषस्कन्धे तुरङ्गमे ।
व्यूहः सङ्घे वितर्के च चमूविन्यासवेगयोः ॥ २७६ ॥
वृषो धर्मे पशौ राशौ श्रेष्ठे शब्दोत्तरस्थितः ।
मूष (C षि) के वासके शृङ्ग्यां पुंविशेषेऽपि शुक्रले ॥ २७७ ॥

267 — d) B कथा° for कुथा°.
269 — c) BCD मघे for मेषे. — d) D वृतौ for व्यूतौ.
272 — c) D शिशौ for बाले. For 273ab cf. *Medinī* and *Viśva* 'वामीशृगालीवडवारासभीकरभीषु च'.
276 — a) BCD मघे for मेध्ये.
277 — b) D श्रेष्ठस्यादुत्तरस्थितः.

विधिर्वेधसि कर्त्तव्ये दैवे कालप्रकारयोः ।
वप्रो रेणौ तटे शाले केदारे शिखरे चये ॥ २७८ ॥
वधूः पत्न्यां स्नुषानारीनवोढासारिवासु च ।
वर्षं संवत्सरे लोके धातुर्वर्षणयोरपि ॥ २७९ ॥
बिम्बं बिम्बीफले यन्त्रे मण्डलप्रतिबिम्बयोः ।
वर्त्तिर्गात्रानुलेपन्यां दशायां दीपकस्य च ॥ २८० ॥
बको रक्षोविशेषे स्याच्छिवभल्लीबकोटयोः ।
श्रीदे **वींषा** (वींखा) पुनः शूकशम्बागत्योश्च नर्त्तने ॥ २८१ ॥
बीजं रेतसि तत्त्वे स्यात्सारे चाङ्कूरकारणे ।
निदानाधानयोश्चापि **वाज**शब्दस्तु निःस्वने ॥ २८२ ॥
वेगे पक्षे मुनौ **वाजं** यज्ञान्ने सलिले घृते ।
व्रजो मार्गे कुले गोष्ठे **वर्णो** ताले वणिग्जने ॥ २८३ ॥
करणेऽपि च वाणिज्ये **वेणुर्वंशो** नृपान्तरे ।
वटो वृक्षे गुणे गोले साम्ये भक्ष्यवराटयोः ॥ २८४ ॥
व्यालः सर्पे खले सिंहे श्वापदे दुष्टकुञ्जरे ।
विश्वं कृत्स्ने जगच्छुण्ठ्योर्व्यक्तः स्यात्पण्डिते स्फुटे ॥ २८५ ॥
वसुः सूर्ये नृपे वह्नौ योक्त्रे यूथे सुरान्तरे ।
शुष्के द्रव्ये धने वृद्धौषधे रत्ने रुचि स्मृतः ॥ २८६ ॥
बलो हलायुधे काके रूपे दैत्यान्तरे **बलं** ।
स्थौल्ये स्थामनि सेनायां काले बोले बलाध्वनि ॥ २८७ ॥
ओषधे रत्नदीधित्योर्**बिलं** रन्ध्रनिकुञ्जयोः ।
बिलः शक्रहये **बाली** मेढिभूषाविशेषयोः ॥ २८८ ॥

---

278 — c) B साले for शाले.

279 — d) BC प्रारंभवृष्टिषु.

281 — d) B शिंबा for शंबा.

283 — d) C वर्णः for वणिग्.

284 — b) C reads वेणुवंशे for वेणुर्वंशे.

285 — ab) for ab cf. *Medinī* p. 202, v. 48 cd.

287 — c) C हलायुधो for °युधे; D omits 287cd–8a. 288. — cd) D om. cd.

बालः केशे शिशौ वज्रे पुच्छे **बालं** जले स्मृतं ।
वङ्गे कासतृणे चाथ वेधाविधिमनीषिणोः ॥ २८९ ॥
बलिः पूजोपहारे स्याद्दण्डचामरदण्डयोः ।
जठरावयवे दैत्यविशेषे गन्धकौषधे ॥ २९० ॥
वेगः प्रवाहे किंपाके रये वेतसि वेतसे ।
वङ्गा देशविशेषे स्याद्वङ्गो वृन्ताकतूलयोः ॥ २९१ ॥
वङ्गं त्रपुणि सीसे च **वृषा**[षः] स्यादाटरूषके ।
वृषा शक्रे हये पुंसि **व्यङ्गो** हीनाङ्गभेकयोः ॥ २९२ ॥
बभ्रुः पृथौ मुनौ पिङ्गे नकुलेऽग्नौ हरौ शिवे ।
वत्सं वक्षसि **वत्सस्तु** तर्णकाब्देषु नीवृति ॥ २९३ ॥
विष्टिः कर्मकरे भद्राजूमूल्यप्रेषणेषु च ।
व्यासः प्रपञ्चे विस्तारे मुनौ **वित्तिस्तु** सम्भवे ॥ २९४ ॥
लाभे ज्ञाने विचारे स्याद्वृतिर्वरणवाटयोः ।
वनं प्रस्रवणे गेहे प्रवासे काननेऽम्भसि ॥ २९५ ॥
वानं शुष्कफले क्षामे प्रोते गन्धे कटे गतौ ।
ब्रह्मा विप्रे विधौ वेदे ज्ञाने योगे तपस्यपि ॥ २९६ ॥
वीतिस्तु प्रजने दीप्तौ धावनेऽश्वे शने गतौ ।
वर्त्म नेत्रे छदे मार्गे **वर्ष्म** देहप्रमाणयोः ॥ २९७ ॥
आकारे सुन्दरे **वेणी** केशबन्धप्रवाहयोः ।
वस्नं मूल्ये धने **वृन्तं** स्तनास्ये पुष्पबन्धने ॥ २९८ ॥
वार्त्ता तूदन्तवार्त्ताकीकृष्यादिषु च वर्त्तने ।
वार्त्तं तु वृत्तिविशदे कुशला रोगफल्गुषु ॥ २९९ ॥
विदा ज्ञाने धियां **बिन्दुः** शून्ये पृषतविज्ञयोः ।
वेदिरङ्गुलिमुद्रायां बुधे भूपितभूतले ॥ ३०० ॥

---

291 — c) D वंगः for वंगा; — d) D वंगा for वंगः.
292 — a) C om. वंगं.
296 — b) C गंध for गंधे; D रंगे for गंधे.
297 — c) Cf. *Amara* 3. 3. 121d; — d) Cf. *Amara* 3. 3. 123d.
300 — D om. 300.

शुकः स्याद्यासजे कीरे रक्षोऽमात्ये कृतौ **शुकं** ।
ग्रन्थिपर्णे शिरीषेऽथ **श्लोकः** पद्ये यशस्यपि ॥ ३०१ ॥
शाकः शक्तौ नृपे द्वीपे वृक्षे हरितके स्मृतः ।
शूकः शलाकेऽनुक्रोशे शुङ्गाभिषवयोरपि ॥ ३०२ ॥
शोके **शौकं** तटे कीरगणे स्त्रीकरणान्तरे ।
शको देशेऽन्त्यजे भूपे **शाणो** माने कषेऽपि च ॥ ३०३ ॥
शङ्कुः प्रहरणे सङ्ख्यारुद्रमेण्ढ्रेषु कीलके ।
यादोभेदे **शिफा** मांसीजटामातृसरित्स्वपि ॥ ३०४ ॥
शफं खुरे वृक्षमूले **शङ्खोऽ**स्थन्यसुरे निधौ ।
कम्बौ **श्रीमान्** धनाधीशे स्वर्णे तिलकपादपे ॥ ३०५ ॥
शुचिर्ग्रीष्मे सिते वह्नौ शृङ्गाराषाढमासयोः ।
शुद्धेऽनुपहते च स्यादुपधाशुद्धमन्त्रिणि ॥ ३०६ ॥
शठो धत्तूरके धूर्ते मध्यस्थपुरुषेऽलसे ।
शोणो हयान्तरे रक्ते श्योनाकनदवह्निषु ॥ ३०७ ॥
शिवं भद्रे सुखे तोये **शिवो** योगे श्रुतौ हरे ।
गुग्गुले जम्बुके कीले पुण्डरीके द्रुमोक्षयोः ॥ ३०८ ॥
शिवा हरीतकीफेरुपत्नीकात्यायनीषु च ।
आमलक्यां शृगालेऽपि **शुद्धः** केवलपूतयोः ॥ ३०९ ॥
शेषो नाशे बलेऽनन्ते स्वीकारेतरवस्तुनि ।
श्यामा गुन्द्रा सोमवल्लीनीलीकृष्णातृ[त्रि]वृत्स्वपि ॥ ३१० ॥
फलिनीसारिवन्ध्यास्वप्रसूतस्त्रियां निशि ।
वल्गुल्यां च **शरं** वारि **शरो** विशिखमुञ्जयोः ॥ ३११ ॥

---

301 — a) BCD शुकस्तु for शुकः स्यात्;

303 — c) BC शको देशे भूपभेदे.

304 For 304 D reads शिफा बालविकारे स्यान्मांसीमातृसरित्स्वपि.

305 — a) C वृक्षखुरे मूले; D शिश्ने खुरे° for खुरे वृक्षः. D शेफं for शफं.

311 — c) B तोये for वारि; — d) BC मार्गण for विशिख; D बाणसमूहयोः for विशिखमुञ्जयोः.

शारुर्वज्रे शरे कोपे **शारि**स्तु द्यूतसाधने ।
शकुनौ गजपर्याणे **शद्रि**र्जिष्णुतडित्वतोः ॥ ३१२ ॥
शम्भुर्ब्रह्महरार्हत्सु **शुभः** योगे **शुभं** सुखे ।
शुभा हृद्याखुहीक्षीरीशुद्धापथ्यासु पठ्यते ॥ ३१३ ॥
श्लाघा निन्दानघोपास्त्यभिलाषमहिलास्वपि ।
शृङ्गं विषाणसामर्थ्यसानुपूत्कर्षचिह्नयोः ॥ ३१४ ॥
शृङ्गस्तु मस्तके कूर्चे **शृङ्गी** शूरे पशौ गिरौ ।
शृङ्गी मीनान्तरे स्वर्णे विषायामृपभौपधे ॥ ३१५ ॥
शार्ङ्गं कार्मुकमात्रेऽपि लक्ष्मीनाथशरासने ।
शाखी महीरुहे वेदे राजभेदे नरेऽपि च ॥ ३१६ ॥
शिखी दीपे द्रुमे बाणे वह्नौ केतुग्रहे हये ।
चूडावति क्लीबर्दे ताम्रचूडमयूरयोः ॥ ३१७ ॥
शखिर्भूर्जे नृपे ताले **शोषः** शोपणयक्ष्मणोः ।
शाखा वृक्षभुजे बाहौ वेदाङ्गे तालभित्यपि ॥ ३१८ ॥
पक्षान्तरेऽन्तिके चाथ **शिखा** चूडाग्रमात्रयोः ।
केकिचूडाशिफाज्वालाघृणिलाङ्गलिकासु च ॥ ३१९ ॥
शरद्वर्षात्यये वर्षे **शस्तं** क्षेमप्रशस्तयोः ।
शितिर्भूर्जे सिते नीले **शितं** तीक्ष्णे कृशे श्रुतम् ॥ ३२० ॥
शाले चाकर्णने **शान्तो** दान्ते दीर्घे रसान्तरे ।
शौण्डी च विकपिप्पल्योः **शौण्डो** मत्तप्रसिद्धयोः ॥ ३२१ ॥
शम्बस्तु मुशलाग्रस्थलोहे वज्रेऽथ धूमले ।
शक्तिः शस्त्रे बले वाण्यामुत्साहादावुमाश्रियोः ॥ ३२२ ॥
श्रुतिः कर्णे श्रुतौ वेदे गीतादिध्वनिवार्त्तयोः ।
श्येनः पक्षिभिदि श्वेते **शादः** कर्दमशिप्ययोः ॥ ३२३ ॥

---

315 — b) D मीनांतरे for शूरे पशौ. — c) D reads स्वर्णे शूरे पशौ पुंसि. For 315cd Cf. *Viśvakośa*: 'शृंगी विषायामृषभे स्वर्णमीनविशेषयोः'.

316 — b) C पति for नाथ.

319 — a) C समीपे च for अंतिके चाथ.

323 — a) C शास्त्र° for श्रुतौ°.

शुक्रो हुताशने मासभेदे दैत्यगुरौ सिते ।
शुक्रं नेत्रगदे बीजे **शुभ्रं** दीप्ते सितेऽभ्रके ॥ ३२४ ॥
षडः पेयान्तरे भेदे **षण्डः** स्याद्विड्वरे वने ।
षष्ठी गौरीनिषेकादिसंख्यातिथिविभक्तिषु ॥ ३२५ ॥
स्तोकस्तु चातके स्वल्पे **स्तोमः** स्यान्निकरे मखे ।
स्थाणुः कीले शिवे **सूनुः** सूर्ये पुत्रेऽनुजे द्रुमे ॥ ३२६ ॥
सूना वधालये जिह्वातले **सूनं** सुमेऽङ्कुरे ।
सीरः सूर्ये हले **स्कन्धो** विज्ञानादिषु पञ्चसु ॥ ३२७ ॥
प्रकाण्डे नृपतौ व्यूहे देहे सेवातमण्डले ।
सौम्यो धिष्ण्ये बुधे रम्ये **सन्धा** स्थितिप्रतिज्ञयोः ॥ ३२८ ॥
संविदाचारसङ्केतक्रियाकारेषु तोषणे ।
ज्ञाने नाम्नि प्रतिज्ञायां सङ्ग्रामालापयोरपि ॥ ३२९ ॥
सूतः प्रसूतसारथ्योः पारदे तक्षिण मागधे ।
ब्राह्मण्यां क्षत्रियाज्जाते **सुतः** पुत्रे नृपेऽपि च ॥ ३३० ॥
सीता सीरध्वजापत्ये सुरसिन्धुवरस्त्रियोः ।
सस्याधिदेवतालक्ष्म्योर्भुवि लाङ्गलपद्धतौ ॥ ३३१ ॥
सितो बद्धे कवौ शुभ्रे **सातिर्दा**नावसानयोः ।
सृष्टिः स्वभावनिर्मित्योः **स्फुटो** व्यक्तप्रफुल्लयोः ॥ ३३२ ॥
सलिः सर्पविशेषे स्यात्कीले कलियुगेऽपि च ।
मूर्खे भङ्गे गदे **सगा** वर्गे निर्माणमोहयोः ॥ ३३३ ॥
उत्साहेऽनुमतौ त्यागे स्वभावे निश्चये स्मृतः ।
सुखा प्रचेतसः पुर्यां **सुखं** स्वर्गेऽपि शर्मणि ॥ ३३४ ॥

---

326 — d) C सूर्यपुत्रे for सूर्ये°.

327 — c) C शीरः for सीरः.

329 — a) C सत् for संविद्.

330 — d) D अनुजे नृपे for नृपेपि च.

331 — a) D शीर° for सीर°; C. omits the portion from धिदेवता in v. 331 to निर्मित्योः स्फुटो in v. 332.

332 — b) Cf. *Amara*: 'सातिर्दानावसानयोः' 3. 3. 67; — d) Cf. *Haima-kośa*: स्फुटो व्यक्तप्रफुल्लयोः.

सत्त्वं वित्ते क्रियाकारेऽप्यात्मभावस्वभावयोः ।
पिशाचादौ गुणे प्राणे प्राणिद्रव्यबलेषु च ॥ ३३५ ॥
सालो वृक्षान्तरे दुर्गे **स्थूलः** पीने जडे स्मृतः ।
सिन्धुर्देशे नदे नद्यामब्धौ दन्तिमदे मदे ॥ ३३६ ॥
सह्यः शैले नृपे **सह्यं** सोढव्यायोग्ययोरपि ।
स्वरः शब्देऽपि षड्जादौ **स्वरुः** कुलिशबाणयोः ॥ ३३७ ॥
सत्रमाच्छादने यागे गृहे दाने वने धने ।
साधुस्त्वार्ये मुनौ **सिद्धि**र्योगे निष्पत्तिमोक्षयोः ॥ ३३८ ॥
सोमः समीरे कर्पूरे यागेऽप्सु पितृदैवते ।
ओषध्यां तद्रसे चन्द्रे कपौ किंपुरुषेश्वरे ॥ ३३९ ॥
दिव्यौषधे शिवे विष्णौ दिननाथे बिडौजसि ।
सिंहो मृगाधिपे राशौ श्रेष्ठे स्यादुत्तरस्थितः ॥ ३४० ॥
सुधा पृथ्वीस्नुहागङ्गेष्टिकामूर्वामृतेषु च ।
विकारे चाश्मनां **सूदः** सूपकारे घृतादिषु ॥ ३४१ ॥
सव्यं तु दक्षिणे वामे सङ्ख्येकादिविचारयोः ।
सेव्यमुशीरे सेवार्हे **स्वामी** परिवृढे गुहे ॥ ३४२ ॥
स्वस्ति त्वाशिषि पुण्ये स्यादविनाशादिभव्ययोः ।
सती कात्यायनी साध्वोः साक्षात्प्रत्यक्षतुल्ययोः ॥ ३४३ ॥
हरिर्विष्णौ यमे सिंहे तार्क्ष्ये भेके शुकेऽनिले ।
इन्द्रे चन्द्रे कपावंशौ वर्णाश्वाहीनभीरुषु ॥ ३४४ ॥

---

335 — d) D गुणेषु for बलेषु.

336 — b) D जले for जडे.

337 — b) B आरोग्ययोः.

338 — C trans. ab and cd; — b) BD transp. वने and धने.

340 — a) C °षधि; B °षध्यं.

341 — a) D स्नुही; D बिष्कङ्गा (?) for गंगेष्टिका; — d) D कुरंबिके for घृतादिषु.

342 D om. 342.

343 — D om. 343; — c) C तु पार्वती for कात्यायनी.

अरुणे वरुणे वंशे पावके पारदे द्विपे ।
स्वर्णे लोकान्तरे शुक्रे गिरिशेऽसौ गुहे शनौ ॥ ३४५ ॥
हारो मुक्तागणे चाजौ क्षेत्रमानविशेषयोः ।
यष्टिकादिचये चारौ **हीरो** वज्रहराहिषु ॥ ३४६ ॥
हीरा पिपीलिकालक्ष्म्योर्**हरो** वेसररुद्रयोः ।
वह्नौ **होरा** तु राशीनामर्द्धे लग्ने श्रुतेऽपि च ॥ ३४७ ॥
होमिः क्षीरे घृते वह्नौ **हार्यस्तु** कलिभूरुहि ।
हर्त्तव्येऽथ **हेला** स्याद्विलासावज्ञयोरपि ॥ ३४८ ॥
हेलिः सूर्ये परिष्वङ्गे **हालः** स्यात्सातवाहने ।
हाला मद्ये **हलः** सीरे **हली** कृषकसीरिणोः ॥ ३४९ ॥
हंसो राज्ञि रवौ धर्मे विष्णौ जीवे शिवे सिते ।
तपस्विन्यश्वखगयोः प्राधान्ये चोत्तरस्थितः ॥ ३५० ॥
हस्तो माने भुजे केशात्कलापे धिष्ण्यशुण्डयोः ।
हविर्घृते च होतव्ये **हिंसा** चौर्यादिनाशयोः ॥ ३५१ ॥
हेतिर्ज्वालास्त्रयोरुस्रे **हरिद्**दिशि हयान्तरे ।
तृणभेदे भवेद्वर्णे **हितं** पथ्ये धृते गते ॥ ३५२ ॥
हनुः कपोलावयवे हरिद्रायुधभेदयोः ।
मरणामययोर्**हारी** रम्ये हारान्विते शुके ॥ ३५३ ॥
हन्त हर्षे विषादे स्याद्वाक्यारम्भानुकम्पयोः ।
हठोऽम्बुपर्ण्यां प्रसभे **हीनो** दीनेऽप्यपूरके ॥ ३५४ ॥

---

345 After 345 B adds 'युग्मं'.

346 — a) B गुणे for गणे.

347 — b) C हीरो for हरो; B रुद्रे च बेसरे for वेसररुद्रयोः; — d) B श्रुतांतरे.

348 — b) BC °पादपे for °भूरुहि.

349 — c) B हलं for हलः.

350 — b) C om. विष्णौ; D योनौ for विष्णौ; D transp. शिवे and शिते.

351 — a) A कोशात् (?) for केशात्.

352 — b) D हरिः for हरित्; — c) BC वर्णभेदे for भवेद्वर्णे; — d) D transp. धृते and गते.

क्षत्ता शूद्रात्क्षत्रियायां जाते सारथिवेधसोः ।
नियुक्ते दासजे द्वाःस्थे **क्षीबो** मत्तनृशंसयोः ॥ ३५५ ॥
क्षणः कालान्तरे मध्ये परतन्त्रत्वपर्वणे ।
उत्सवेऽवसरे **क्ष्वेडा** सिंहनादशलाकयोः ॥ ३५६ ॥
क्ष्वेडस्तु गरले वक्रे ध्वाने कर्णामयेऽपि च ।
क्ष्वेडं दुरासदे पुष्पे लोहितार्कफले स्मृतम् ॥ ३५७ ॥
क्षमा तु क्षान्तिमेदिन्योः **क्षमः** शक्ते क्षमावति ।
युक्ते तालभिदि **क्षेमो** मङ्गले लब्धरक्षणे ॥ ३५८ ॥
मोक्षे **क्षारो** रसे काचे गुडे च लवणादिषु ।
क्षुद्रा व्यङ्गानटीवेश्याचाङ्गेरीसरघासु च ॥ ३५९ ॥
क्षरं वारि **क्षरो** मेघे क्षुद्रशब्दस्तु निर्धने ।
नृशंसे कृपणें स्वल्पे निःकृष्टच्छलयोरपि ॥ ३६० ॥
क्षेत्रं देहे भगे पत्न्यां केदारे भरतादिषु ।
क्षीरं दुग्धेऽमृते तोये **क्षितिर्गेहे** भुवि क्षये ॥ ३६१ ॥
श्रीमत्सोमभवः सलक्षसचिवो वाग्कण्ठभूपाङ्कभृत्
सन्प्रासूत सुतं महीपममलं सौभाग्यदेवी च यं ।
अस्मिन् सच्चरितेन तेन रचिते **नानार्थनामालये**
ग्रन्थे व्यक्षरसंज्ञकः समभवत्काण्डस्तृतीयाग्रजः ॥ ३६२ ॥

इत्यनेकार्थतिलके द्वितीयः काण्डः ॥

---

355 — a) ABC शूद्रा for शूद्रात्.
356 — b) BC पर्वणोः.
357 — d) AC रोहितायाः for लोहितार्क.
358 — c) B तालांतरे for तालभिदि,
359 — c) C. *Amara* 3. 3. 177.
362 — b) C om. सुतं. — c) C om. तेन (hapl.).

Colophon :—D om. the colophon. C adds व्यक्षरसंशकः after °तिलके; B adds the following colophon—इति श्रीमहीपकृतौ महीपकोशस्यानेकार्थतिलक-व्यक्षरसंशकः द्वितीयः काण्डः परिसमाप्तः ।

After काण्डः C adds परिये ग्रंथे व्यक्षरसंशकः समाप्तः ॥ ३ ॥

॥ तृतीयः काण्डः ॥

॥ अथ तृतीयं काण्डम् ॥

अकाराद्यादिभिः शब्दैरस्मिन्वर्णत्रयाभिधः ।
तृतीयः क्रियते काण्डः क्रमात्पण्डितमण्डनम् ॥ १ ॥
अभितोऽभिमुखे शीघ्रे पार्श्वे कात्स्न्र्येऽपि चाव्ययं ।
अनूकमन्वये शीलेऽप्य**नूको** गतजन्मनि ॥ २ ॥
अशोको वञ्जुले वीतशोके कङ्केल्लिसूतयोः ।
अशोका कटुरोहिंण्या **मलीकं** वितथेऽप्रिये ॥ ३ ॥
ललाटे करणे**ऽयोगः** कर्कशोद्यमकूटयोः ।
वियोगे विधुरेऽपि स्याद**मोघः** सफले स्मृतः ॥ ४ ॥
अमोघा तु हरीतक्यां विडङ्गेऽप्य**वटः** बिले ।
कूपे खिले महारण्ये दृष्टः कुहकजीविनि ॥ ५ ॥
अनन्तं विपुले वारि व्योम्न्य**नन्तो** हरौ बले ।
शेषे**ऽनन्ता** महीहैमवतीदूर्वामृतासु च ॥ ६ ॥
अर्बुदः पर्वते मांसे संख्यायां मांसकीलके ।
अक्षरं गगने वर्णे तपस्यध्वरधर्मयोः ॥ ७ ॥
निर्वाणेऽपि परब्रह्ममूलकारणयोरपि ।
अभयं वीरणीमूले निर्भयेऽपि मनोहरे ॥ ८ ॥
अभया तु हरीतक्याम**जिरं** प्राङ्गणेऽनिले ।
दर्दुरे विषये कायेप्य**त्ययः** कृच्छ्रनाशयोः ॥ ९ ॥
दोषे दण्डेऽतिक्रमे स्याद**भीषुः** प्रग्रहत्विषोः ।
अङ्कुरं रुधिरे रोम्णि नवोत्थाने तरौ जले ॥ १० ॥

---

2 — a) D अभितस्त्वरिते पार्श्वे; — b) D (उ)भये for पार्श्वे; — for 2c cf. *Ajayapāla*: 'अनूकमन्वये शीले'; for 2d cf. *Medinī* 'अनूको गतजन्मनि'.

3 — D विङ्गिः प्रमोदे पारदे स्मृतं for वीतशोके°.

7 — b) CD रुजि° for मांस°,

10 — c) Cf. *Medinī* 'अंकुरो रुधिरे लोम्नि'.

अरिष्टः फेनिले निम्बे लशुने काकशङ्कयोः ।
दैत्येऽरिष्टं शुभेऽक्षेमे सूतिकागारतक्रयोः ॥ ११ ॥
अङ्गजं रुधिरे केशेऽङ्गजो मन्मथपुत्रयोः ।
अञ्जनं कज्जले याने सौवीरेऽपि रसाञ्जने ॥ १२ ॥
अञ्जनो दिग्गजे शैलेऽञ्जना मारुतिमातरि ।
अमरस्त्वस्थिसंहारे स्नुहीवृक्षे सुरे कवौ ॥ १३ ॥
अमृतं गगने हृद्ये स्वर्णे तोये रसायने ।
कैवल्ये गोरसे यज्ञे शेषे माक्षीकवर्णयोः ॥ १४ ॥
सुधायाचितयोरन्नेऽमृतो धन्वन्तरौ सुरे ।
अमृता मागधी पथ्यागुडूच्यामलकीषु च ॥ १५ ॥
अनयः व्यसने नाशेऽशुभे दैवेऽपि पामरे ।
अथावधिर्बिले सीमावधानसमयेषु च ॥ १६ ॥
अरुणो भास्करे रक्ते निःशब्दे कपिले बुधे ।
सन्ध्यारागे रवेःसूतेऽव्यक्तरागेऽपि चारुणा ॥ १७ ॥
नृ [त्रि] वृत्यतिविषाश्यामामञ्जिष्ठास्वपि दृश्यते ।
अम्बरं गगने वस्त्रे सुरभिद्रव्यतूलयोः ॥ १८ ॥
अर्जुनो धवले चक्षूरोगे हैहयकेकिनोः ।
तृणे द्रुमे चैकपुत्रे मातुर्मध्यमपाण्डवे ॥ १९ ॥
आप्लुतः स्नातके स्नातेऽप्याकल्पः कल्पवेषयोः ।
आतङ्को रुजि सन्तापे मुरजध्वनिशङ्कयोः ॥ २० ॥

---

11 — a) A reads अनिष्टः; for ab cf. *Medini* "अरिष्टो लशुने निंबे फेनिले काककङ्कयोः" ।

13 — a) C अंजना for °नः.

15 — For 15cd cf. *Medini* which agrees entirely with *Mahīpa*.

16 — c) ABC बले for बिले.

17 — d) A अरुणं; C अरुणः.

19 — a) D नेत्र° for चक्षू°.

20 — a) ABC स्नाने for स्नाते.

आशुगः पवने बाणे रवौ चारोह उच्चये ।
दैर्घ्ये माने गजारोहे स्त्रीकट्यां च समुच्चये ॥ २१ ॥
आयतिः संहतौ भावे स्वाधीनोत्तरकालयोः ।
आत्मभूर्मदने शम्भौ वासुदेवमहेशयोः ॥ २२ ॥
आसत्तिः संगमे लाभेऽप्याका[क?]रो निकरे मणौ ।
खन्यामा**नद्ध**माख्यातं मुरजादिकनद्धयोः ॥ २३ ॥
आशयः स्यादभिप्रायेऽप्याश्रये पनसद्रुमे ।
आदित्यः त्रिदशे भानावा**म्नायः** कुलआगमे ॥ २४ ॥
आनर्त्तो नृत्यसदने समरे जनदेशयोः ।
आयस्तः क्ष्टिते क्षिप्ते तेजिते कुपिते हते ॥ २५ ॥
आक्रन्दः क्रन्दनारावे भूपे दारुणसंयुगे ।
आकर्षः पाशके द्यूतभिदाकर्षणयोरपि ॥ २६ ॥
आषाढो व्रतिनां दण्डे मासे मलयपर्वते ।
आनकः पटहे भेर्यां मृदङ्गे मेघनिःस्वने ॥ २७ ॥
इक्ष्वाकुः कटुतुम्बिन्यां भूपभेदेऽप्यथेतरः ।
अन्यस्मिन्पामरेऽपि स्यादि**ष्वासं** चापधन्विनोः ॥ २८ ॥
इष्वासः विशिखक्षेपे **इन्द्रियं** रेतसि स्मृतं ।
हृषीके वे**रिणं** शून्योषरयोश्च निराश्रये ॥ २९ ॥
उन्माथः स्याद्वधे कूटयन्त्रे दृष्टस्य घातके ।
उर्वरा पृथिवी सर्वसस्याढ्यधरयोरपि ॥ ३० ॥
उत्थानमुद्गमे सैन्ये पौरुषोद्यमयोर्युधि ।
उदारः दक्षिणे दातर्युदरं हृदि संयुगे ॥ ३१ ॥

---

21 — b) D उच्चयोः for उच्चये; — d) B समुच्छ्रिते; C समुच्छ्र्यो(:); D समुच्छ्र्ये.
23 For 23a cf. *Haimakośa* 3. 240c: 'आसत्तिः संगमे लाभे'.
24 — b) D आश्रयः; — d) B reads आम्नाय आगमे कुले.
25 — cd) Cf. *Medinī:* आयस्तस्तेजिते क्षिप्ते क्लेशिते कुपिते हते. 27ab = *Medinī* p. 58 st. 6cd; — b) A °भूरुहे; BC °भूधरे.
28 — b) c अथांतरः.
30 — b) ABC दृष्टः (?); — d) D सस्याढ्या°.
31 — d) AB उदारं (wrongly) for उदरं.

उच्छ्रितं तून्नते ख्यातं जातमात्रप्रवृद्धयोः ।
उदानो जठरावर्त्ते सर्पवायुविशेषयोः ॥ ३२ ॥
उद्यानं सरणेऽरण्यविशेषेऽपि प्रयोजने ।
सुरवर्त्मन्यथो**त्तंसः** कर्णपूरेऽपि शेखरे ॥ ३३ ॥
उत्थितं तु समुत्पन्ने सञ्जाते वृद्धिमत्यपि ।
उचितं विदितेऽभ्यस्ते मिते युक्तेऽप्युदाहृतम् ॥ ३४ ॥
उदूढः पृथुलेप्यूढेऽप्युपलः प्रस्तरे मणौ ।
उत्कटश्चोद्धटे क्षीवेऽप्युदर्चिः पावकद्रुवोः ॥ ३५ ॥
अतियन्यनुजे वीरेऽप्यु**रगः** पन्नगेऽर्भके ।
उल्लाघः निर्गदे वृक्षे निपुणे शुचिहृष्टयोः ॥ ३६ ॥
उन्मत्तः कितवोन्मादमुचुकुन्देषु पल्लवे ।
उत्पलं तूपलोऽद्रौ मासशून्याब्जभेदयोः ॥ ३७ ॥
उष्णीषं शेखरे शीर्षवेष्टने लक्षणान्तरे ।
उच्छ्वासः प्राणने गद्यबन्धभिच्छ्वासयोरपि ॥ ३८ ॥
ऊर्णायुः कम्बले मेषे श्वेतवर्णोर्णनाभयोः ।
ऋषभो वृषभे नाम्नः परःश्रेष्ठे जिनेश्वरे ॥ ३९ ॥
कर्णरन्ध्रे स्वरे कोलपुच्छे भेषजभिद्यपि ।
ऋषभी दृश्यते शूकश(शि)म्बीपुरुषाकृतियोषयोः ॥ ४० ॥
ऊशीरं चमरे दण्डशयनासनभेदयोः ।
कौतुकं मङ्गले कामे गीतादौ च कुतूहले ॥ ४१ ॥
प्रमोदे विषयाभोगे विवाहपटलेऽपि च ।
कुण्डली वरुणे व्याले मयूरे कुण्डलान्विते ॥ ४२ ॥
केसरी तुरगे सिंहे पुन्नागे नागकेसरे ।
करणं साधने काये कायस्थेन्द्रियकर्मसु ॥ ४३ ॥

---

32 — a) D उत्थितं for उच्छ्रितं.
34 For 34 cd cf. *Haima* 3. 242 cd : उचितं विदितेभ्यस्ते मिते युक्तेप्यथोत्थितं ।.
35 — b) A उपले for उपलः.
37 — a) ABC कितवाक्षीव° for कितवोन्माद° ; — b) CD मुचकुन्देषु.
40 — c) B स्यात् for दृश्यते ; — d) D °शिम्बिन्याकृति°.
41 — d) D विख्याते for गीतादौ.
42 — b) BC पटले क्षणे.

योगीनामासनादौ च गीतनाट्यविशेषयोः ।
बालवादौ च **करणः** ख्यातः शूद्राविशोः सुते ॥ ४४ ॥
कुटजस्तरुभेदे स्यादगस्त्यद्रोणयोरपि ।
करटः करिणां गण्डे दुर्मुखे काकवाद्ययोः ॥ ४५ ॥
मृतश्राद्धे कुसुम्भेऽथ **कीलालं** रुधिरे जले ।
क्षीरे पुष्परसे मण्डे घृतमद्यामृतेषु च ॥ ४६ ॥
कम्बलं कमले नीरे **कम्बलो** नागसास्नयोः ।
वैकक्ष्ये चेन्द्रिये कीटे **कुन्तलो** विषयान्तरे ॥ ४७ ॥
धम्मिल्लहल्योस्तक्ष्णि कुन्तहस्तास्त्रभेदयोः ।
कषायः सुरभौ रागे रसे वर्णद्रवाङ्गयोः ॥ ४८ ॥
कषायं बदरे स्निग्धे **काकिणी** तु वराटके ।
गुञ्जायां पणतुर्यांशे **कल्याणं** हेम्नि मङ्गले ॥ ४९ ॥
नगरे **कसिपुर्व**स्त्रे प्राकारे वल्भने यतौ ।
करीरः कलशे वृक्षविशेषे वैणवाङ्कुरे ॥ ५० ॥
कलमो लेखनीशालिभिदोरङ्कूरचोरयोः ।
कपिलः कुकुरे पिङ्गे पावके वासवे मुनौ ॥ ५१ ॥
कपिला रेणुकायां च गोभेदे शिंशिपाद्रुमे ।
वह्न्यां च करिणीभेदे **कामलो** रोगकामिनोः ॥ ५२ ॥
वसन्ते मरुदेशे स्यात्**कुम्भिलो** मीनचोरयोः ।
श्लोकच्छायाहरे श्याले **कुलालः** कुकुभे द्रुमे ॥ ५३ ॥
कुम्भकारे तथा घूके **किट्टालो** लोहकुम्भयोः ।
कन्दलं कलहे शब्दे न्यङ्कुभेदोपरागयोः ॥ ५४ ॥

---

46 — c) D मांसे for मण्डे.

49 — a) D रक्ते for स्निग्धे; — b) BD काकणी; — c) D पणाक्षौ (c क्षे) दण्ड° for गुंजायां पण°; — d) For d Cf. *Haima* 3. 186 d.

50 — d) c वेणवांतरे.

52 — c) B लतायां for वह्न्यां च.

53 — a) B च for स्यात्; — c) D दुर्गे (?) for श्याले.

54 — c) D दृष्टं for शब्दे.

कलापेऽपि नवाङ्कूरे **कलङ्को**ऽङ्कापवादयोः ।
अयोमले **कुसुम्भं** तु लट्वाहेम्नोः कमण्डलौ ॥ ५५ ॥

कलत्रं भूभुजां दुर्गस्थाने नीव्यङ्कभार्ययोः ।
कोहलस्तु मुनौ मद्ये **कोमलं** मृदुतोययोः ॥ ५६ ॥

कमलं भेषजे पङ्के शीर्षे पद्मेऽम्बुताम्रयोः ।
कमलो हरिणे रोगे सुधांशौ **कमला** श्रियाम् ॥ ५७ ॥

कलापस्तूणके बर्हे मेखलायां च सञ्चये ।
कुशलं सुकृते क्षेमे पर्याप्तौ **कुशलो**ऽखले ॥ ५८ ॥

कर्कशो निर्दये तिग्मे कम्पिल्ये कासमर्दके ।
दृढे साहसिके खड्गे परुषे चेक्षुमत्तयोः ॥ ५९ ॥

कौशिको गुग्गुले शक्रे घूके सर्पधरे मुनौ ।
कोशज्ञे नकुले ताले **कौशिकी** सरिदन्तरे ॥ ६० ॥

कपोतः पक्षिणां भेदे पारापतविहङ्गमे ।
कापोतं तु कपोतानां संहतौ मञ्जनेऽञ्जने ॥ ६१ ॥

कुमारो बालके स्कन्दे युवराजेऽश्ववारके ।
वरणानोकहे कीरे **कुमारी** तटिनीभिदि ॥ ६२ ॥

जम्बूद्वीपांशपार्वत्योः **केटिरु**र्नकुले स्मृतः ।
शक्रगोपे सुनासीरे कुटा(ट्टा)रं केवले रते ॥ ६३ ॥

कनकं चम्पके स्वर्णे धत्तूरे नागकेसरे ।
कालीये किंशुके दृष्टं काञ्चनारेऽथ **कण्टकः** ॥ ६४ ॥

---

55 — d) D कदलीशागत्रवृक्षयोः.
56 — c) मनौ for मुनौ.
57 — d) B मृगाङ्के (D चंद्रेपि) for सुधांशौ.
58 — b) D om संच (hapl.).
60 — a) AD कौशिके; B गुग्गुलौ.
61 — a) B पक्षणां; — cd) For 61cd CD read: 'क (D का) पोतम (D मं) ज (ञ्ज) ने वाप्यां कपोतानां च संहतौ ।'
62 — a) c स बालके for बालके.
63 — a) D °द्वीपेपि पार्वत्यां for °द्वीपांशपार्वत्योः; — b) AD कैटिरः; — c) B शुना (C सुना) शीरे.

नरके (नखे?) शाखिनामङ्गे रोमाञ्चे वेणुवैरिणोः ।
कुमुदं कैरवे दैत्यनागयोर्दिग्गजे कपौ ॥ ६५ ॥
कु(क)कुभो भूरुहे वीणाप्रसेवे रोगभिद्यपि ।
कानीनः कन्यकाजाते व्यासे चम्पापतावपि ॥ ६६ ॥
कृतान्तोऽन्तकसिद्धान्तदैवाकुशलकर्मसु ।
करको मेघपाषाणे पात्रभेदे कमण्डलौ ॥ ६७ ॥
दाडिमेऽपि खगे बाहौ **कारकं** कर्तृकर्मणोः ।
कटुकं कटुरोहिण्यां तिक्ते व्योषेऽथ **कञ्चुकः** ॥ ६८ ॥
चोले वर्द्धापके वारवाणे निर्मोकवृक्षयोः ।
कदम्बः शिखरे वृक्षविशेषे निकुरम्बके ॥ ६९ ॥
सर्षपे **कीकसं** शल्ये कारावस्थनि **कीकसः** ।
वानरे भिक्षुके कीरे **कश्मलः** पापपङ्कयोः ॥ ७० ॥
कटकं कङ्कणे राजधानीभद्विजभूषयोः ।
नितम्बे भूभृतः सैन्ययोगे बाहुविभूषणे ॥ ७१ ॥
कोट्टारो नगरे कूपे **कर्णिका** मध्यमाङ्गुलौ ।
दन्तिशुण्डामुखे बीजकोशे पङ्केरुहस्य च ॥ ७२ ॥
कुट्टिन्यां कर्णभूषायां **कीटको** निष्ठुरे कृमौ ।
कीचको रन्ध्रमद्वेणौ वृक्षदैत्यविशेषयोः ॥ ७३ ॥
कुलिकस्तु कुलश्रेष्ठे नागे योगान्तरे तरौ ।
कूर्चिका कुञ्चिकायां च क्षीरस्य विकृतावपि ॥ ७४ ॥
आलेख्यलेखनीसूचीकोरकेष्वथ **कोरकं** ।
कक्कोलद्रौ मृणाले स्यात्कुड्मले **कुशिको** मुनौ ॥ ७५ ॥

---

65 — b) AD दोषवैरिणोः for वेणु°, C वेष°.
67 — a) D °सिद्धांते for °सिद्धांत°; — b) D दैवी° for दैवा°. For ab Cf. *Medinī* p. 82. 105cd. 69. — a) D वर्द्धापने; — d) B निकुरुंबके.
71 — a) CD लवणे for कंकणे; — b) D °भूषणे for °भूषयोः; — c) B च गिरेः, CD (wrongly) शिखरे for भूभृतः; C om. भूभृतः.
72 — a) AB नागरे for नगरे; — d) D °कोश for °कोशे.
73 — a) AB कुट्ट° (D currupt कुटि°) for कुट्टि°.
74 — c) B कून्चिका.
75 — a) CD लेखिनी.

सर्जे बिभीतके फाले **कालिङ्गः** गजसर्पयोः ।
क्रकचः करपत्रे स्यात्कर्कशे ग्रन्थिलद्रुमे ॥ ७६ ॥
अथो (?) **कणीचिः** शकटे गुञ्जावल्लीविशेषयोः ।
कम्बोजः करिणां भेदे शंखदेशविशेषयोः ॥ ७७ ॥
करजस्तु नखे वृक्षे **कूपीटं** जठरे जले ।
करेणुर्गजहस्तिन्योः कर्णिकारद्रुमेऽपि च ॥ ७८ ॥
कौङ्कणो विषये वृक्षे **कौङ्कणं** त्वायुधान्तरे ।
कायस्थो मारुते वर्णजीवके परमात्मनि ॥ ७९ ॥
कायस्था तु हरीतक्यां तथा चामलकीद्रुमे ।
कपर्दः पार्वतीनाथजटाजूटे वराटके ॥ ८० ॥
कीनाशस्तु कदर्येस्याद्राक्षसे कर्षु(र्ष)के यमे ।
कुसुमं तु फले पुष्पे स्त्रीरजे नेत्ररोगयोः ॥ ८१ ॥
कङ्कणं मण्डने हस्तसूत्रे च भुजभूषणे ।
कमठः कच्छपे भाण्डविशेषे दानवान्तरे ॥ ८२ ॥
कदली हरिणे दन्तिपताकामोचयोरपि ।
कान्ताराख्या वने विघ्ने दुर्गमार्गेक्षुभेदयोः ॥ ८३ ॥
कुतपः समये रूप्ये दौहित्रे सलिलेऽप्यजे ।
कम्बलेऽपि तिले दर्भे खङ्गे पात्रे हुताशने ॥ ८४ ॥
भागिनेये घृते सूर्ये द्विजन्मन्यतिथौ गवि ।
कुटपः निःकुटे माने मनावप्यथ **कश्यपः** ॥ ८५ ॥
मुनौ मीनविशेषे स्यात्**काश्यपी** तटिनीभुवोः ।
कुकुदं तु प्रधानेंसे वृषाङ्गे राजलक्ष्मणि ॥ ८६ ॥
कबरी केशविन्यासे **कबरं** लवणाम्लयोः ।
कुलायः पक्षिणां स्थाने सदनेऽपि कुलोद्भवे ॥ ८७ ॥

---

79 — a) c कोकणो; D कौंकुणो; — b) B कौंकणं; — d) B °क्षेत्रके (in marg. *sec. m.*), D °विशेषे for °जीवके.
81 — b) D कर्बुके for कर्षके.
82 — b) D °भूषिते for °भूषणे.
83 — a) C कदला (in marg.) हरणी for कदली हरिणे; — c) C कान्ताराख्य; C विघ्न (D शक्रे) for विघ्ने.
85 — d) C मुखानावथ (corrupt).

खिङ्खिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके ।
खर्जूरं तु फले रूप्ये **खर्जूरो** गृहगोधिके ॥ ८८ ॥
क्षुद्रजातौ तरोर्भेदे **खनकः** सन्धितस्करे ।
मूषके वित्ततत्त्वज्ञे **खङ्गिकः** यन्त्रनिःस्वने ॥ ८९ ॥
महिषीक्षीरफेने च चण्डाले लोहभिद्यपि ।
खपुरः मुस्तके वृक्षे लसके कुम्भपूगयोः ॥ ९० ॥
गन्धर्वः गायने चाश्वे खेचरे हरिणान्तरे ।
ग्रहणं स्वीकृतौ शब्दे गुणे यत्नोपरागयोः ॥ ९१ ॥
ग्रन्थिको ग्रहचारज्ञे माद्रेये गुग्गुले द्रुमे ।
ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णविडङ्गयोः ॥ ९२ ॥
गोलको मणिके गोले जारतः विधवासुते ।
गणिका यूथिकावृक्षे तर्कारीपण्ययोषयोः ॥ ९३ ॥
गण्डकी तटिनीभेदे **गण्डकः** खड्गिविघ्नयोः ।
विद्यावच्छेदसंख्यासु **गोरङ्कु**बन्दिनग्नयोः ॥ ९४ ॥
खगेऽथ **गोपतिः** शक्रे षण्ढे बल्लवरुद्रयोः ।
वरुणे सरितां नाथे दिननाथे महीपतौ ॥ ९५ ॥
गोदन्तो दंशिते नद्धे हरितालेऽथ **गोस्तनी** ।
हारहूरालतावृत्तियोजनास्त्वथ **गोस्तनः** ॥ ९६ ॥
हारेऽपि **ग्रन्थिलो** ग्रन्थिवृते वेणौ विकङ्कते ।
करीरे गौरिलो गर्वे सिद्धार्थे लोहचूर्णके ॥ ९७ ॥
गोपुरं नगरद्वारे मुस्तकद्वारयोरपि ।
गोपालो बल्लवे भूपे **गोकिलो** मुशले हले ॥ ९८ ॥

---

88 — For 88 ab cf. *Medinī* p. 180 147 cd; — CD च खिखीरके for वारिवालके.
89 — b) C खनकं for खनकः.
90 After 90 ab C adds खपुलेख्यलेखनीशूचीकोरके before मुस्तके. Cf. 75 ab.
92 — b) माद्रिये ; B गुग्गुलौ ; — d) C om. ग्रंथिपर्ण.
94 — b) A गंडका, D खड्ग for खड्गि ; — c) CD °विच्छेद for °वच्छेद°.
97 — a) D पाशीवृते for ग्रंथिवृते.
98 C. om. (hapl) from र्‌·········to वाद्यभांडेपि in v. 99.

गोमुखं कुटिलागारे वाद्यभाण्डेऽपि लेपने ।
ग्रामणीर्भोगिके श्रेष्ठे नापितेऽप्यधिपेऽपि च ॥ ९९ ॥
गोष्पदं ध्वनिते माने गवां गम्येऽपि गोचरे ।
गर्जितो मत्तमातङ्गे **गर्जितं** मेघनिःस्वने ॥ १०० ॥
गोकर्णोऽनामिकाङ्गुष्ठमाने सर्पे मृगे गणे ।
गह्वरं तु बिले दम्भे **गैरिकं** धातुरुक्मयोः ॥ १०१ ॥
गालवस्तु मुनौ लोध्रे **गाङ्गेयः** स्कन्दभीष्मयोः ।
गाङ्गेयं मुस्तके स्वर्णे सुन्दरेऽपि कशेरुके ॥ १०२ ॥
चक्राङ्गी कटुरोहिण्यां **चक्राङ्गो** मानसौकसि ।
चन्दनी चन्द्रिकानद्योश्चन्दनो वानरे द्रुमे ॥ १०३ ॥
चूडाला चक्रलायां च **चूडाल**श्चूडया युते ।
चलनोऽह्रौ धुते कम्पे **चलनी** करणान्तरे ॥ १०४ ॥
चमसः पिष्टभेदेस्यात्लड्डुके कर्पटेऽपि च ।
चरणं त्वदने शब्दे भ्रमणे **चरणः** पदे ॥ १०५ ॥
गोत्रे मूले बह्वृचादौ **चामरः** काशीपुष्पयोः ।
माकन्दे केतने चापि **चमरी** हरिणीभिदि ॥ १०६ ॥
चमरश्चामरे दैत्ये **चञ्चलो**ऽनिलकामिनोः ।
चपलः क्षणिके मीने चिकुरे **चपलं** पुनः ॥ १०७ ॥
विलोले पारदे शीघ्रे **चपला** पिप्पलीश्रियोः ।
ऐरावत्यां **चिरण्टी** तु यौवनाश्रितयोषिति ॥ १०८ ॥
सुवासिन्यां च **चिपिटः** पिच्चितातत्तखा···योः (?) ।
चित्रकं श्वापदे चित्रे प्रजातौ व्यन्तरोरगे ॥ १०९ ॥
अनले तिलके चापि स्वस्तिके गदभिद्यपि ।
चक्राटो विषवैद्ये च दीनारे दुर्जनेऽपि च ॥ ११० ॥

---

101 — b) D मृगांतरे for मृगे गणे.
102 — b) CD गागेय for गांगेयः.
103 — d) AB चंदने for चंदनो.
105 — c) D चलनं रासमे for चरणं त्वदने ; C चरणं त्वदारणं ने (?).
108 — C om. (hapl.) from पारदे······to खातयोः in verse 109.
110 — a) C वापि for चापि ; — c) C चक्राटे for चक्राटः.

चाम्पेयश्चम्पके स्वर्णे किञ्जल्के नागकेस(C श)रे ।
चक्कुरः स्यन्दने वृक्षे **चत्वरं** तु चतुष्पथे ॥ १११ ॥
प्राङ्गणे स्थण्डिले चाथ **चिकुरः** सर्पशैलयोः ।
वृक्षे च भ्रूलये केशे चञ्चले विहगान्तरे ॥ ११२ ॥
चन्दिरस्तु गजे चन्द्रे **चन्द्रिलो** नापिते शिवे ।
वास्तुके चाथ **चात्वालो** यज्ञकुण्डेऽर्भगर्भयोः ॥ ११३ ॥
छदनं तु दले पक्षे **छेदनं** भिदि कर्त्तने ।
छर्द्दनोऽलम्बुके [षे] निम्बे **छर्द्दनं** वमने स्मृतम् ॥ ११४ ॥
छगलाख्या पुटे मेषे नीलिकारञ्जिताम्बरे ।
छगली त्वौषधीभेदे **छित्वरो** रिपुधूर्त्तयोः ॥ ११५ ॥
जृम्भितं वर्द्धिते रोगे जृम्भणोत्फुल्लयोरपि ।
चेष्टितेऽथ **जिगीषा** स्याज्जयेच्छाव्यवसाययोः ॥ ११६ ॥
जयनं तुरगादीनां सन्नाहे विजये स्मृतं ।
जर्जरस्तु जराजीर्णे कोकिले वासवध्वजे ॥ ११७ ॥
जीवकः प्राणके ज्येष्ठे क्षपणे वृद्धिजीविनि ।
सेवके चासने वृक्षे व्यालग्राहेऽथ **जीविका** ॥ ११८ ॥
वर्त्तनेऽपि च जीवन्त्यां **जतुकं** हिङ्गुलाक्षयोः ।
जरणो जीरके कृष्णजीरके रुचके जले ॥ ११९ ॥
जटायुर्विहगे वृक्षे गुग्गुले **जम्भलः** पुनः ।
देवताभिदि जम्वीरे **जम्बूलः** क्रकचच्छदे ॥ १२० ॥

---

112 — a) D चिकुरः केशे for स्थंडिले चाथ; — b) D चकुरः for चिकुरः; — c) D वृक्षांतरे गृहे for वृक्षे च भ्रूलये, C पादपे for वृक्षे च.

113 — a) A चंचिरः (?) for चंदिरः; C om चंद्रे; — d) D शिशावपि for अर्भगर्भयोः.

114 — For 114ab cf. *Haimakośa* 3. 367ab; — d) D वमनं for वमने.

115 — d) A मूर्त्तयोः for धूर्त्तयोः.

116 — a) B वर्द्धने for वर्द्धिते; ABC रागे for रोगे.

118 — c) D चातके for च आसने.

119 — a) C नर्त्तने for वर्त्तने; C जीवत्यां for जीवंत्यां; for 119b cf. *Medinī* p. 10, 91d and *Haimakośa* 3. 46d.

120 — c) C om जंबीरे.

जम्बूवृक्षेऽपि **जम्बालं** कर्दमे कर्दमान्तरे ।
जङ्गलं पिशिते गर्त्ते निर्जलस्थानदेशयोः ॥ १२१ ॥
जीमूतो जलदे शैले **जीवनं** वृत्तिजन्मनोः ।
संहतावुदके वृक्षे **जम्बुकः** फेरुपाशिनोः ॥ १२२ ॥
जगती भुवने भूमौ लोकेऽपि च्छन्दसां भिदि ।
जठरं तूदरे चित्ते कठिने तालभिद्यपि ॥ १२३ ॥
टगरष्टङ्कणे वृक्षे केकराख्येऽथ **टङ्कणः** ।
कोपेऽश्मदारणे टङ्के **टट्टरी** वक्रवाद्ययोः ॥ १२४ ॥
तरलश्चपले खङ्गे हारमध्यमणौ बले ।
भास्वरे **त्रिदिवं** ख्यातमाकाशसुरलोकयोः ॥ १२५ ॥
तुषारः शीकरे शीते **तरस्वी** वेगवत्तरे ।
बलिष्ठे **तिलकं** वृक्षे चित्रके तिलकालके ॥ १२६ ॥
ललामे रुचके क्लोम्नि **तैतिलं** तिलपर्पटे ।
गण्डके करणे चाथ **तलिमं** कुट्टिमे स्मृतम् ॥ १२७ ॥
तल्पे विताने **तलिनं** स्वल्पे तल्पेऽपि निर्मले ।
तोदनं पीडने तोत्रे **तरसं** बलमांसयोः ॥ १२८ ॥
तेमनं व्यञ्जने क्लेदे **तेमनी** चुल्लिभिद्यपि ।
तरणिस्तु तरीसूर्यकुमारीतरुणांशुषु ॥ १२९ ॥
यष्ट्यब्ध्योस्**तरुणो** यूनि नूतनैरण्डयोः सुमे ।
तक्षकः पन्नगे तक्ष्णि वृक्षभेदेऽथ **तण्डकः** ॥ १३० ॥
खञ्जरीटे तरुस्कन्धे फेने मन्दिरदारुणि ।
तारको नाविके दैत्ये **तारकं** नेत्रतारयोः ॥ १३१ ॥

---

121 — c) ABC गर्त्त.
122 — c) D जीवे for वृक्षे.
123 — c) D हृदये for तूदरे ; — d) B कठिनेपि नियंत्रिते for कठिने ताल°.
124 — b) BCD टट्टरी for टंकणः — For 124cd BCD read : वाद्ये(cवादे) वक्रेपि टंकारो ज्यारवे विदितेद्भुते.
125 — c) A भास्करे for भास्वरे. C adds vv. 125–34 in margin.
128 — a) CD खङ्गे for तल्पे ; D तलिमं for तलिनं.
130 — a) D तरुणो नूतने for यष्ट्यब्ध्योः.
131 — b) BC सदन for मंदिर.

नक्षत्रे च **त्रिशङ्कुस्तु** मार्जारे शलभे नृपे ।
तूलिकालेख्यलेखिन्यां तूलतल्पशलाकयोः ॥ १३२ ॥
तमालो वरुणे खड्गे पुण्ड्रतापिच्छयोरपि ।
तुम(मु)लं भीमसंग्रामे **तुमुलस्तु** बिभीतके ॥ १३३ ॥
दौर्वीणं मृष्टपत्रे स्याद्धरितालीरसे स्मृतं ।
द्वितीया तिथिगेहिन्योर्**द्रविणं** तु पराक्रमे ॥ १३४ ॥
दृश्यते द्युम्नवद्द्रव्ये पित्तलौषधसंघयोः ।
दारदः पारदे वत्सनागे हिङ्गुलवर्णयोः ॥ १३५ ॥
द्विजन्मा वौ रदे विप्रे **द्वापरः** संशये युगे ।
देवनं तु जिगीषायां व्यवहारविहारयोः ॥ १३६ ॥
दुर्जातं व्यसनेऽसम्यग्जातवस्तुनि पठ्यते ।
दीपितं भासिते दग्धे तथा निर्भासितेऽपि च ॥ १३७ ॥
दुकूलं स्वम्बरे पट्टकूले भूर्जदलेऽपि च ।
दायादस्तनये ज्ञातौ **दिवौका**श्चातके सुरे ॥ १३८ ॥
दारको भेदके पुत्रे **दीप्यकं** त्वजमोदके ।
यवान्यां **दीपको** वृत्तालंकारे पक्षिभिद्यपि ॥ १३९ ॥
दीपे दीप्तिकृति ख्यातौ **द्विजातिः** पक्षिविप्रयोः ।
दुर्मुखः करिणां भेदे मुखरे कपिवाजिनोः ॥ १४० ॥
द्रोहाटो गर्दभे दृष्टो बिडालप्रतिकेऽपि च ।
मृगलुब्धे चतुष्पद्यां **दमथो** दमदण्डयोः ॥ १४१ ॥
दुर्दरो (दर्दुरो) जलदे भेके शैले वाद्यस्य साधने ।
दण्डारो मत्तमातङ्गे कुलालारीषुयन्त्रयोः ॥ १४२ ॥
दासेरः करभे चेटे **दुर्वर्णं** स्वर्णरूप्ययोः ।
दहनश्चित्रके वह्नौ भल्लाते दुष्टचेष्टिते ॥ १४३ ॥

---

132 — c) B लेखन्यां; for 132d D reads: तले तूलस्य दृश्यते ।.
134 — ab) for 134ab cf. *Haimakośa* 3. 198ab.
139 — a) C बाले for पुत्रे; — b) CD दीपकं; — d) AB पक्ष° for पक्षि° for 139cd D reads: वृत्तालंकरणे केकियवान्योरप्यदीपकः ।.
142 — For 142cd BC add: दर्शनं दर्पणे शास्त्रे दमनो वीरपुष्पयोः ।
143 — a) C om. करभे; — b) D °तारयोः for °रूप्ययोः.

धेनुका धेनुहस्तिन्योर्धेनुको दानवान्तरे ।
धेनुकं धेनुवृन्दे च नारीणां करणान्तरे ॥ १४४ ॥
धिषणस्त्रिदशाचार्ये **धिषणा** तु धियामपि ।
धरणस्तरणौ शेषे धान्ये लोके स्तने गिरौ ॥ १४५ ॥
धरणं धारणे मानविशेषे **धरणी** भुवि ।
धूसरो रासभे वर्णे **धूमलः** शकटाङ्गयोः ॥ १४६ ॥
धाराटश्चातके चाश्वे निर्दये निन्दकेऽपि च ।
धवलो वृषभे शुभ्रे कर्पूरे तरुचन्द्रयोः ॥ १४७ ॥
धर्षणं सुरते दुःखे **धर्षणी** पुंश्चलीरयोः ।
धावनं सुगतौ शौचे **धनपो** धनदाढ्ययोः ॥ १४८ ॥
निर्वेशस्तूपभोगे च मूर्च्छने वेतनेऽपि च ।
निकायो वसतौ लक्ष्ये समूहे **निगमः** पुरे ॥ १४९ ॥
वेदे वणिक्पथे मार्गे **निसर्गो** विश्वनिर्मितौ ।
स्वभावे **निग्रहो** दण्डे मर्यादायां च भर्त्सने ॥ १५० ॥
निवातस्त्वाश्रये गाढसन्नाहे पवनात्यये ।
निर्यूहः शेखरे द्वारि निर्यासे नागदन्तके ॥ १५१ ॥
आपीडे **निःक्रमो** तुल्ये धीसामर्थ्ये च निर्गमे ।
निःकृतस्त्वधमे विप्रलब्धे विप्रकृतेऽपि च ॥ १५२ ॥
नियमो निश्चये ज्ञाने यन्त्रणायां व्रतेऽवधौ ।
निर्वाणं निर्वृतौ मोक्षे विनाशे दन्तिमज्जने ॥ १५३ ॥
न्यग्रोधस्तु वटे व्यामे **निपाकः** स्वेदपाकयोः ।
असत्कर्मफले चापि **नायको** नेतरि स्मृतः ॥ १५४ ॥

---

144 — a) D नंदिनीदेव्योः for धेनुहस्तिन्योः.
148 — For 148ab D reads: धर्षणं सुरते धृष्टौ धावनश्च पचेतरौ ।
149 — d) C निगमे for निगमः.
150 — a) D वृक्षे for मार्गे.
151 — For 151cd cf. *Medinī* p. 241, 18ab; — cd) For cd D reads: निर्यासो दंतिनां दंते निवासे द्वारि (शे)खरे ।.
152 — a) BC कुल्ये for तुल्ये; D दुःकुले for तुल्ये; — b) D बुद्धिसामर्थ्ये for धीसामर्थ्ये.
153 — a) D निश्चले for निश्चये; — b) C व्रतौ for व्रते; — d) D °बंधने for °मज्जने.

प्रधाने मणिभेदे स्यान्नालिका कालनालयोः ।
चुल्हीरन्ध्रे बिले वंशभाजने **नर्त्तको** नटे ॥ १५५ ॥
द्विरदे केलिके मत्स्ये **नर्तकी** नृत्यकृत्स्त्रियां ।
निकृतिस्तु शठे शाठ्ये **निस्त्रिंशः** क्रूरखड्गयोः ॥ १५६ ॥
निषधः कठिने देशे निषधे स्वरे गिरौ (?) ।
हस्तके करिभेदे च **निवेशः** पुरविवाहयोः ॥ १५७ ॥
विन्यासेऽपि वरूथिन्यां **नीकाशो** निश्चये समे ।
निर्देशः कथने वाक्ये **निदेशः** परिभाषणे ॥ १५८ ॥
समीपे शासने दृष्टे **निर्माणं** तु समञ्जसे ।
विधाने सारनिर्मित्योर्**नन्दकः** कुलपालके ॥ १५९ ॥
हर्षके चक्रिणः खड्गे **निषादः** श्वपचे स्वरे ।
नलदं वीरणीमूले मकरन्देऽपि दृश्यते ॥ १६० ॥
नरको निरये दैत्ये **नालीकः** शल्यबाणयोः ।
अब्जेऽब्जे कमलारण्ये **निर्मोकः** सर्पकञ्चुके ॥ १६१ ॥
मोक्षके खेऽपि सन्नाहे **निषङ्गो** योगतूणयोः ।
नर्मठश्चूचुके षिङ्गे **निशान्तं** शान्तगेहयोः ॥ १६२ ॥
प्रभाते **निर्वृतिः** सौस्थ्ये मृत्यौ मोक्षे सुखेऽपि च ।
निर्ग्रन्थः श्रमणे भिक्षौ निर्द्धने कदलीद्रुमे ॥ १६३ ॥
पतङ्गं पारते दृष्टं शलभे **पतङ्गः** (गः ?) खगे ।
पद्मके तरणौ सस्ये जीमूते रक्तचन्दने ॥ १६४ ॥
प्रसवः शाखिनां पुष्पे फले गर्भस्य मोचने ।
अपत्येऽपि तथोत्पादे **प्रभावः** शक्तितेजसोः ॥ १६५ ॥

---

156 — b) C om. कृत्स्त्रियां; — d) ABC निस्तृंशः (corrupt).
157 — b) C शैखरे for स्वरे; — d) C निदेशः for निवेशः.
159 — b) CD समञसे for समुच्चये.
160 — b) D निर्वादः for निषादः.
161 — b) B °पाणयोः (?) for बाणयोः; — c) CD नलिके for अब्जेऽब्जे.
162 — a) C चंचुके for चूचुके; CD खिङ्गे for षिंगे,
163 — b) A निर्द्धनः for निर्द्धने.
165 — c) B उत्पत्तौ for उत्पादे.

पर्वतः शैलदेवर्ष्योः **पार्वती** गिरिशस्त्रियां ।
जीवन्त्यां सल्लकीवल्लीविशेषाद्रौपदीषु च ॥ १६६ ॥
पुष्करं भेषजे तीर्थे पद्मदन्तिकराग्रयोः ।
द्वीपे तूर्यमुखे वारिव्योमखड्गफलाहिषु ॥ १६७ ॥
प्रभवः स्थानके मूले जन्महेतौ पराक्रमे ।
प्रज्ञानं तु धियां चिह्ने **प्रकारो** भेदसाम्ययोः ॥ १६८ ॥
पुलाको भक्तिसिक्थेंऽशे संक्षेपक्षुद्रधान्ययोः ।
पर्यङ्कः स्यात्परिकरे मञ्चके **पृथुको**ऽर्भके ॥ १६९ ॥
चिपिटेऽथ **प्रकाशः** स्यादुद्द्योते प्रकटे गदे ।
प्रमाणं कारणे सत्यजल्पिते मानशास्त्रयोः ॥ १७० ॥
पुङ्गवः गवि भैषज्ये श्रेष्ठे शब्दोत्तरस्थितः ।
पर्जन्यो वासवे पक्षिविशेषे गर्जदम्बुदे ॥ १७१ ॥
पर्याप्तं तु यथेच्छायां पूर्णे शक्तिनिषेधयोः ।
प्रदरो व्यूहभङ्गेषुगदभेदप्रभीतिषु ॥ १७२ ॥
पललं पिशिते पङ्के पिण्याके रक्षसि स्मृतं ।
परुषं कर्बुरे रूक्षे सद्दशक्रूरवाक्ययोः ॥ १७३ ॥
पुद्गलः सुन्दराकारे कायात्मद्रविणेषु च ।
पादपो भूरुहे पादपीठे पादरथे स्मृतः ॥ १७४ ॥
प्रधानं तु महामात्रे प्रकृतावात्मपूज्ययोः ।
गीःपतौ **पल्लवः** षिङ्गविटपाञ्चललक्ष्मसु ॥ १७५ ॥
शृङ्गारे विस्तरेऽलक्तरागे किसलये बले ।
पुलको मणिदोषे स्यात्कृमिभिद्यश्रुसंहतौ ॥ १७६ ॥

---

168 — a) C प्रभावः for प्रभवः.
169 — d) D पृथुके for पृथुकः.
171 — b) BC स्यात् for शब्द.
172 — d) ABC °भेदे for °भेद°.
173 — d) D तालभेदकठोरयोः.
174 — d) A पादवीथे (?).
176 — b) ABC पि च for बले.

रोमाञ्चे सामयोन्यन्नपिण्डेऽश्मह्रिताल्योः ।
प्रवालो वल्लकीदण्डे विद्रुमे द्रुमपल्लवे ॥ १७७ ॥
प्रबलेऽथ **पलाशः** स्याद्रक्षोवर्णविशेषयोः ।
च्छदने शाखिनां भेदे पाशे तालान्तरेऽपि च ॥ १७८ ॥
प्रघणोऽलिन्दके ताम्रकलशे लोहमुद्गरे ।
प्रासादो देवतागारे पृथिवीपालमन्दिरे ॥ १७९ ॥
प्रणयः स्यात्प्रार्थनायां प्रीतिविश्रम्भयोरपि ।
पुरुषः पूरुषे प्राणे पौरुषं तु पराक्रमे ॥ १८० ॥
ऊर्द्ध्वविस्तृतदोःपाणिनृमाने तेजसीष्यते ।
पिण्डारो महिषीपाले भिक्षुकद्रुमभेदयोः ॥ १८१ ॥
पवित्रं तु कुशे पूते **प्रगाढं** गाढकृच्छ्रयोः ।
पिचुलो निचुले नीरवायसे झाबुकद्रुमे ॥ १८२ ॥
पीतनं कुङ्कुमे पीतकाष्ठेऽपि हरितालके ।
पिशुनं कुङ्कुमे ख्यातं **पिशुनः** सूचके खले ॥ १८३ ॥
पौलस्त्यो रावणे श्रीदे **पङ्कारो** वारिकुब्जके ।
सोपाने शैवले सेतौ **पटलं** पिकटौघयोः ॥ १८४ ॥
तिलकच्छदिषोर्नेत्ररोगेऽध्याये परिच्छदे ।
पाठीनः पाठके मीनविशेषे गुग्गुलद्रुमे ॥ १८५ ॥
पाकलं कुष्ठभैषज्ये **पाकलः** करिणां ज्वरे ।
पाचलः पवने वह्नौ राधनद्रव्यपाकयोः ॥ १८६ ॥
पिङ्गलः फणिभिद्यर्कपरिपार्श्वे कपौ शनौ ।
कपिले **पिङ्गला** नाडीवेश्ययोः करिणीभिदि ॥ १८७ ॥

---

178 — b) D राक्षसे सितवर्णयोः.
180 — c) D पूषणे for पूरुषे.
181 — ab) For 181ab cf. *Medinī* p. 230 v. 42cd.
182 — C om. 182cd.
183 — C om. 183a.
185 — For 185ab D reads: तिलके संचये नेत्ररोगभित्परिवारयोः ।
186 — a) C पावनः for पाचलः.
187 — b) A पारि° for परि°.

पिण्याकः सिह्लके हिङ्गुवेरयोस्तिलचूर्णके ।
पिनाकः पांशुवर्षे स्यात् शर्वचापत्रिशूलयोः ॥ १८८ ॥
पेचकः करिलाङ्गूलमूलेऽघूकेऽथ **पुष्पकं** ।
कासीसे मृत्तिकाङ्गारशकटीनेत्ररोगयोः ॥ १८९ ॥
विमाने यक्षराजस्यायःकांस्येऽपि रसाञ्जने ।
प्लवगो वानरे भेके रेवन्ते सायकेऽपि च ॥ १९० ॥
पन्नगः पद्मको(का)ष्ठेऽहौ **प्रयागो** यज्ञशक्रयोः ।
अश्वे तीर्थेऽथ **पुन्नागः** पाण्डुनागे सितोत्पले ॥ १९१ ॥
द्रुमे नरे फले जात्याः **पलिघः** शालगोपुरे ।
काचस्य कलशे कुम्भे **परञ्जः** क्षुरिकाफले ॥ १९२ ॥
तैलयन्त्रेऽप्यसौ फेने **पिचटं** त्रपुसीसयोः ।
नेत्ररोगे **परीष्टिः** स्यात्परिचर्यापरीक्षयोः ॥ १९३ ॥
पूत्यण्डो गन्धकृत्कीटे गन्धैणेऽप्यथ **पक्षिणी** ।
पौर्णमासीपतत्पल्योः शाकिनीरजनीभिदोः ॥ १९४ ॥
पत्तोर्णं धौतकौशेये **पत्तोर्णः** शोणके स्मृतः ।
प्रमथा तु हरीतक्यां **प्रमथः** शिवसेवके ॥ १९५ ॥
फाल्गुनो मासभेदे स्यादर्जुनार्जुनवृक्षयोः ।
नदीजे **फाल्गुनी** पौर्णमासीभेदे च फेनिलम् ॥ १९६ ॥
सफेने बदरे कामफलेऽरिष्टेऽथ **फालकः** ।
चीरभेदे गतौ दिव्ये **फेरवः** फेररक्षसोः ॥ १९७ ॥
भूजम्बूः स्याच्च गोधूमे विकङ्कतफलेऽपि च ।
भूतीकं भूतृणे दृष्टं यवान्यां कट्फलौषधे ॥ १९८ ॥

---

189 — b) C om. मूले.
190 — b) A रसायने.
192 — After 192c BDC add: परिधो योगमूलयोः ॥ १९१ ॥ अर्गले परिघातेऽस्त्रे प्रतिघो रुद्विहंगयोः । परागेऽद्रौ ग्रहे रेणौ ।
193 — c) ABC नेत्रभेदे for नेत्ररोगे; ABC om. स्यात्.
195 — ab) For ab cf. *Haimakośa* 3. 204cd.
196 — For पौर्णमासी……फेनिलं D reads विद्यासौर्णमारीभिदीष्यते ।
197 — a) D फेनिलं for सफेने; — d) BD फेरु° for फेर°.
198 — a) D भूजंतुः for भूजंबुः.

घनसारेऽपि भूनिम्बे **भूकेशः** शैवले द्रुमे ।
भ्रामके(को) जम्बुके दुष्टे सूर्यावर्त्ताश्मभेदयोः ॥ १९९ ॥
भावाटः कामुके साधुनिवेशे भावके स्मृतः ।
भारती पक्षिणीवाचो(चि) वृत्तौ वचसि **भारतम्** ॥ २०० ॥
पुराणद्वीपयोरङ्ग **भरतो** नटशास्त्रयोः ।
मुनौ रामानुजे भूपे क्षेत्रेऽपि शबरे जिने ॥ २०१ ॥
भ्रातृव्यो भ्रातृजे शत्रौ **भुवनं** विष्टपे जले ।
भूतात्मा विधौ देहे **भ्रमरः** षट्पदेऽभिके(?) ॥ २०२ ॥
करणे **भ्रामरं** क्षौद्रभेदे दृषदि **भास्करः** ।
वह्नौ रवौ च **भार्योरुः** परनारीरते मृगे ॥ २०३ ॥
मल्लिका मृत्तिकापात्रे वाद्ये (?) मीने सुमान्तरे ।
मोचकः कदलीशिग्रुद्रुममोक्तृविरागिषु ॥ २०४ ॥
मेचकस्तिमिरे कृष्णे श्यामले केकिचन्द्रके ।
मोचाटः कदलीसारे चन्दने कृष्णजीरके ॥ २०५ ॥
मालती तु स्त्रियां जातीकाकमाचीसरित्स्वपि ।
ज्योत्स्नानिशाविशल्यासु **माकन्द्या**मलकीफले ॥ २०६ ॥
माकन्दो मन्मथे चूते **मुकुन्दः** पारदे हरौ ।
निधौ तालेऽथ **मेनादो** मार्जारे मेषकेकिनोः ॥ २०७ ॥
मञ्जरी वल्लरीस्थूलमुक्तयोस्तिलकद्रुमे ।
मुदिरः कामुके मेघे **महेन्द्रो** वासवे गिरौ ॥ २०८ ॥
माठरो वाडवे व्यासे तिग्मरश्म्यनुगेऽपि च ।
मुहिरो मूढिते कामे **मिहिरो**ऽर्केऽब्दबुद्धयोः ॥ २०९ ॥

---

199 — c) CD भ्रमको for भ्रामको.
200 — d) CD वृत्तिभिग्रथ for वृत्तौ वचसि.
202 — c) CD विविधो for विधौ.
204 — b) AD खाद्ये (?) for वाद्ये.
205 — c) A om. सारे.
206 — d) D द्रु(द्रु)मे for °फले.
208 — d) C माहेंद्रे for महेंद्रः.

मुर्मुरः सूर्यतुरगे तुषाग्नौ मकरध्वजे ।
मण्डलं वर्तुले देशे बिम्बे द्वादशराजके ॥ २१० ॥
कुष्ठभेदे शुनि स्थाने संघाते परिधावहौ ।
मसूरा पण्ययोषायां व्रीहिभेदेऽथ **मर्म्मरः** ॥ २११ ॥
शुष्कपत्रध्वनौ वस्त्रे **मर्मरी** पीतदारुणि ।
मुद्गरः कोरके शस्त्रे ताले लोष्टादिभेदने ॥ २१२ ॥
मन्थरो विपुले मन्दे मथिकोशेऽपि सूचके ।
माधवो भूपतौ मासि वसन्ते गरुडध्वजे ॥ २१३ ॥
मदनो मन्मथे वृक्षे मधूच्छिष्टवसन्तयोः ।
मन्दरस्त्रिदिवे सीरे मन्दारे मन्दशैलयोः ॥ २१४ ॥
मन्दिरं नगरे गेहे **मन्दिरो** मकरालये ।
मन्दारः पारिभद्रेऽर्कपर्णे देवद्रुमान्तरे ॥ २१५ ॥
यमकं च्छन्दसां भेदे **यमको** यमजे व्रते ।
याजको याज्ञिके पृथ्वीपाले दन्तिनि **यापनम्** ॥ २१६ ॥
निरासे कालविक्षेपे वर्त्तने चाथ **योजनं** ।
युक्तावपि चतुःक्रोश्यां परमात्मन्यपीष्यते ॥ २१७ ॥
रोहितो लोहिते मत्स्ये शक्रचापे मृगान्तरे ।
रोहीतकद्रुमे धीरे **रुधिरं** कुङ्कुमेऽसृजि ॥ २१८ ॥
मङ्गले रजनीरात्रौ हरिद्रायां च **रैवतः** ।
उज्जयन्ते सुवर्णालौ पिनाकिन्यपि वर्त्तते ॥ २१९ ॥

---

210 — a) ACD तुरगे सूर्ये (C भानौ) for सूर्यतुरगे.

